वैदिके विधाय वास्तुवेनेभ नृबलिं च प्रथयितेति नारदः। प्रथमं सौम्यायने कार्यं नववेश्मप्रवेशनं राज्ञो यात्रा
निवृत्तौ कालविलंबसम महतो वोढ्र्व्यं वृ सिद्ध स्वरमात स्वतो हि विरोधे विषयकल्पने वोचितानत्वविकल्पः
यथोक्ते स्वतिहृद्यं यत्र स्यात्तत्र प्रथमावुभौ स्वतो स्वतिहैवे तविषयः कल्पनीयः पृथक्पृथगिति चलमतिप्र
सङ्गेन यात्रानिवृत्ताविति स्वतिविज्ञान राथा सगरेवरः ध्रुवाः प्रसिद्धाः यभिनंदस्तैव राज्ञो यात्रानिवृत्तौ प्र
वेशनं शुभदं यदि द्विशेर स्थिरौ वृषभ हरलाभिजित्ति हि वैवेः श्रवणायनिष्ठा शननारवाशु नवे सुस्वातीभिनंद
तैः प्रवेशनं स्यात्तदा पुनरपि राज्ञो गमो यात्रा स्यात् तस्मादेनानि मध्यमानि हीनानि दिनदन्तेषु प्रवेशोकमात्
स्वीशुचादीनां नाशः तथा विशाखायां प्रवेशास्त्रियाः पत्नीमरणं कृत्तिकायां प्रवेशे गृहनाशमग्निनाशं हृदि गये
स्यात् दाहलाभेमूलाज्येष्ठाश्लेषासु प्रवेशे भ्रात्मनः स्वस्यैव राज्ञो मरणं स्यादित्यर्थः यदाह श्रीपतिः शुभः प्र
वेशोस्त्वभिर्ध्रुवैर्वैदैः द्विदैवे व्याधितैः स्यात्सुतनैरवयायात्रा उग्रे नृपोदाहलाभेः ऊमात्रैरात्रौ विशाखासु विनाशमेति ।
कृत्तिकासम्भवे वह्निकृपाणुना दग्धनेष्ठ विशतां न संशय इति कृपाणमग्निः श्यामेग्रेष्णुकृतास्याश्रोक्तानि पंचो
गत्वाम्रशुद्धिः रद्योपयोगात् नमूलवाक्यात्तु च्यते वेदज्ञोपमितवासरेषु तच्छ्रीकरं सत्तव महार्थलाभदं सूर्यगृ
नदिवसे स्थिरभपदं किं न चौरभयमत्र विघातेश्वति श्रीपतिः रिक्तातिथिर्भस्तनभानवासरैर्वर्जितयाष्ट्रयोगाः पि
वर्जनीयामेषः कुलीरोमकरसंस्तुलावत्याज्या प्रवेशोपितदातनेरणाइति भद्रमेषादिनिंघलग्नानं फलंसाप

मु॰
चिं॰टी॰
१७४
175

वादमुक्तं राजमार्तण्डे भूयो यात्रामेषलग्नप्रवेशेनाशं गच्छेत्कर्कटस्योदयेव व्याधितौ लिप्याष्रितेसग्र।
वर्तिन्या कोकेरेवाम्बुयाद्वान्यानाशं म्राकोणे मकरः लग्नेत्वज्ञांशकेप्येषामेते दुष्टफलप्रदाः शुभान्यवा
निलग्नानि प्रवेशे भूनयोविद्धः निन्दिता अपि शुभांशासमेतास्तोलिमेषमकराः सकुलीराः कर्तभोपचय
मास्थविलग्नेत्तापायः शुभफलानि भवंतीति वसिष्ठः त्रिकोणकेंद्रनिधनायसंस्थैः शुभैस्त्रिषष्ठायगतैः
खलैश्च लग्नांत्यषष्ठाष्टविवर्जितेनचंद्रेणलक्ष्मीनिलय प्रवीयः प्रवेशोनवांशलग्नेशुभेक्षितेवाप्यथसं
युतेवा प्रवेशलग्नात्रिधनस्थितोयः क्रूरग्रहः क्रूरगृहेयदिस्यात् प्रवेशकर्तारमथत्रिवर्षाद्धंत्याष्टवर्षैः शुभग्र
श्रिताश्चेतरइति अत्रदप्याह वसिष्ठः हत्वा शुक्रेपृष्ठतोवामतोर्केविप्रान्पूजान्यग्रतः पूर्णकुंभे हर्म्यंरम्यंतो
रणस्रक्पिनाद्यैः स्त्रीभिः स्रग्वीगीतवाद्यैर्विशेषाद्दिति वामसूर्यंज्ञानमाह विश्वकर्मा लग्नात्सागादितो
दिव्द्वौद्वौराशीन्नियोजयेत् एकमेकंत्यसेत्कोणे सूर्योवामेविचिंतयेत् अथवेदंदेयं यत्रमासेयात्रातन्म
सात्रवमेमासियात्रादिनानवमेदिनेवाप्रवेशोनिषिद्धः यदाहगुरुः निर्गमान्नवमेमासिप्रवेशोनैवशो
भनः नवमेदिवसेचैवप्रवेशोनैवकारयेत् यत्तत्सविशेषंतुनूतनगृहप्रवेशव्याख्यानावसरेभिधास्यतइत्या
यात्राप्रसंगात्प्रसक्तमिति १०७ अथविवाहप्रकरणंतत्रदोषान्तिथिपात्रन्यासागक्रान्माचारोषाम्रख्यि
ख्याणमविस्मवर्णात्थमंजुभाषिणीवृत्तत्रयेणाहवसिष्ठः अथयनतत्रमासतिथिकालवामरोअवष्ठल

सेम्न एवसितत्तदिककपाः म्रगुवक्रनादिपविचारवदेडकोयुवनीवजोप्यशुचिनोन्मवादिकं स्तनपद्मरिक्तव
वितर्कसेत्तुकास्तिण्ययस्पसोविवविभोमवामदाः श्रपिवामएहगविपुलत्पाउलोवसपेचकाभिजिदप्पापिदद्वि
णे २-१ लग्नेजन्मर्दतत्त्वोस्तेतिशुद्दस द्विताद्वोष्पषहंतदोणवालग्रेकेंभमीनद्दनवलवतनूवापिपृष्ठोदयेच
एषा शासेम्यस्पद्वेदशमशनिमषोसभमवापिकाव्यः केंदेवकाश्चवक्रिग्रहादिवमविवाहोक्रदोषायाग्रायोवक्र
व्यनायानेष्टः नग्रायनस्तुलाः सौम्यायनेसूर्यविधूनदोत्नमभित्यादिकाः मासोङ्गवाः स्तुलोयाग्रायोस्नवोदयणाहेत
वेंतोभद्रचक्रेभिहितः यथाग्रयस्त्रयाहूषायाश्वपूर्वाषाढिवुधेः क्रमात्‌ राशयोद्वादपोवंतमेषान्ताः स्तह्रिमार्गे
गाः यत्रपूर्वादिकाष्ठायांहृघराष्पादिगोरविः सादिशास्तमितातेयास्तिस्तः शेषाः सदोदिताइतितद्दत्रवार
स्तुलाः नपूर्वदिशिपाकभि नविधुसौरवारेतथेत्तज्ञातिथिस्तुलेयोगिनी नवभूम्याः शिववक्रयदृस्तक्ताः सं
स्तवेसितत्तदिककपाः सेम्नवेशुक्ताः सेम्नवोवुधः सेम्नवोदिकस्वामीलालादिकत्वेनयद्रोदितस्ताकक्रभे
नपायादित्यादिनोक्ताः भृगुवक्रनाशुक्रत्ता आदिशद्वान्दोणस्तमितनीचवानपराजितत्ववाल्यादिकंवावः
कास्तनीवेत्तुकेंपविचारवेदडकः पूर्वादिदिद्वचवदिंह्लिनस्यैः युवतीवजः सपत्नीरजोदर्शने स्रपोगंचजननम
रणपेवेच श्चशुचिनेनपत्रनशुन्दवे शुचितस्वभावेशुचितूस्यशुचिनोशुक्रपादित्पनेनन पानिषेधः सप्ये तस्मा
त्तत्रादनेनवेवदस्माण प्रस्तावप्रयस्य उन्मवदीपोत्सवादिः आदिशद्वेनविवाहव्रतबंधादिः स्तनपद्मल

मोभुक्तताराइत्युक्तः रिक्तारविनर्कसंख्यकश्चतुर्थीनवमीचतुर्दशीद्वादशीषष्ठीतिथयः उपलक्षणत्वाद्दृष्ट
मीपूर्णिमामावस्याशुक्लप्रतिपदः सौरिरविभौमवासराः शनिसूर्यमंगलवाराः अयंचनिषेधोदिक्कूलेनस
र्वत्रेति प्रागभिहितेवामाष्टषष्ठगतविधुर्वपि वामभागेपृष्ठभागेवचंद्रेनिषिद्धः उक्तंच संमुखोऽर्थलाभायदक्षि
णेसुखसंपदः पृष्ठतोमरणंचंद्रेवामेचंद्रेधनक्षयः इति एतच्चनिर्हूलत्वादेप्राप्तेसत्यपि सूलत्वेवेपत
त्सर्वेहाविकलनत्रव्यतिरेकेमतेये श्वस्यथासर्वत्रदिक्शूलनिषेधेपुष्यादीनांसर्वदिग्द्वारकतांभजेत् न
पावडलः रेवभेताम्रभीमित्युक्तः उपलक्षणत्वाद्ममपिनिषिद्धं वसुपंचकं वसुधाह्वेनपरिहारार्थमष्ट
नेतदादिकंनक्षत्रपंचकं अभिजित्संज्ञकोमुहूर्तोदिवसेष्टमे एतद्वयमपिदक्षिणे एतेपंचाराद्दोषाः अ
यलग्नदोषाः लग्नेयाचालग्नेविचारयितव्यसति जन्मर्क्षतत्त्वाज्जन्मराशिजन्मलग्नसंबंधी सतिशुद्धमष्टम
स्थानं अहितंतत्त्वान्शत्रुराशेः शत्रुलग्नाद्वाष्टमं षष्ठस्थानेतद्दोषाः स्वजन्मराशितोष्टमाधिपतिः स्वजन्म
लग्नाद्वाष्टमाधिपतिः स्वशत्रुराशितः षष्ठमास्त्रीस्वशत्रुजन्मलग्नाद्वाषष्ठाधिपतिः एतेलग्नेलग्नस्थिता
स्युः कुंभमीनहेतवलवतनुकुंभलग्नंमीनलग्नंवा लग्नांशसंभवेवाकुंभनवांशोमीननवांशोवाष्टमे
दयेचषष्ठेदप्राराणाय गोजाश्वे इतिवराहोक्तः षष्ठाष्टाशसंस्थस्त्वेदेशिगविलामलग्नमित्यर्थः दशमेषष्ठेन
सप्तमेशुक्रः केंद्रेवक्रिणोग्रहाः वक्रिग्रहस्यवक्रिग्रहस्यांशोवा वक्रिग्रहाणांवादिवसाः एतेदोषायात्रायोने

षाः सर्वथैव वर्ज्याः ॥ अत्रोपयुक्तवाक्यानि प्रागेव लिखितानि ॥ अथ च विवाहोक्तदोषा विवाहप्रकरणे
ऽभिहिता ये दोषास्तेऽपि निषिद्धाः ॥ ते इमे उत्पातान्महापातदग्धातिथिभिर्दुष्टांश्च योगांस्तथा चन्द्रेज्योश
नसामथास्तमयनं तिथ्योः क्षयं हीनतथा गंडान्तं च सविष्टिसंक्रमदिनं तत्त्वं पापांशस्तथा नवांशं पोषवि
धूनथाष्टविधुगान्पापस्ववर्गं तथा सेन्दुः क्रूरखगोदयं पापमृदयास्तं शुद्धिवेधं शुभागर्भान्नं रेदशयोग
योगसहितं जामित्रलत्ताव्ययं वाणोपग्रहपापकर्तरि तथा तिथ्यर्क्षवारोत्थितं दुष्टं योगमथार्धयां
मकुलिकाद्यान्वारदोषानपि क्रूराक्रान्तविमुक्तभं ग्रहणभं सत्क्रूरयातत्वभं वेधान्यान्तदहं नवकेन्द्रहतभं
संध्योदितं भं तथा तद्वद्वाग्रहयुग्मित्रयुद्धगतभं सर्वानिमान्संत्यजेदुद्वाहे शुभकर्मसु ग्रहकृतांल्लग्न
स्य दोषानपीति ॥ यदाह वसिष्ठः ॥ एकविंशतिमहादोषास्त्वेते ब्रह्मसुखोदिताः ॥ कदाचिन्नैव सिद्ध्य
ति गुणानां कोटिकोटिभिः ॥ तस्मादेतेषु दोषेषु कदाचिन्नाचरेत्क्रमं विवाहे विधवा नारी मरणं
व्रतबन्धने गृहनाशः पतिश्चापि सीमन्ते गर्भनाशो नवान्नभोजने रुक्ष्यः क्षयो न तत्फलनाश
ने कर्णवेधे गृहारंभे प्रवेशे पतिनाशो नाशाने यात्रायां कर्तुर्नाशः स्याद्गुह्यानि विशेषतः लभन्ते सुम
हत्स्त्रणमेघ प्राद्यादिकर्मभिरिति ॥ अत्र सम्मतशुकवाक्यानि किंचिन्नामित्र दोषाय न्यर्कोदिमास्तदा

दोषोऽपि नास्तीति ध्येयं यतुक्तं गणेशदैवज्ञैः सर्वस्व
त्वयनजे मासास्तदोषो विनेति मासदोषो यत्न क्वापि
शस्तदोषोऽत्रामित्रदोषः तत्रापि शुक्रराहित्यं विवर्जितं य
तः ससमशुक्रस्य यात्रायां विशेषनिषेधोऽस्ति वृषाउह्रू
प्रशस्तावेवं एवं मासदोषजामित्रदोषाविवाहोक्तायां
यात्रायां न निषिद्धाः किन्तु विहिताः इत्येतद्द्वयमत्रैव विवा।
होक्तदोषा यात्रायां निषिद्धा एवेति शिवम् ॥ ॥
इति श्रीदैवज्ञानन्तसुतदैवज्ञरामविरचिते मुहूर्ते।
चिन्तामणौ यात्राप्रकरणं समाप्तम् ॥ ॥
अतः परं वास्तुप्रकरणं भविष्यति ॥

ॐ नमो विघ्नहर्त्रे श्रीगुरुभ्यो नमः श्रीवाग्देव्यै नमो नमः ॐ अथ यथा वास्तुप्रकरणं व्याख्यायते तत्र त्रिविधप्रवेशो व
सिष्ठाभिहितः अपूर्वसंज्ञः प्रथमः प्रवेशस्तत्रादौ सद्गृहनिर्माणं यतस्तन्निर्माणं गृहारंभ उच्यते यदाह श्रीवसिष्ठः
ग्रामसद्मपुरादीनां निर्माणं सूत्रणं धनेति गृहनिर्माणप्रयोजनमभिहितं भविष्यत्पुराणे गृहस्थस्य क्रियाः स
र्वा न सिद्ध्यंति गृहं विना ततस्तस्मात् गृहारंभप्रवेशसमयो ब्रुवे गृहे स्वसत्ताकेन सिध्यति निष्फला भवंतीत्य
र्थः एतदपि स्पष्टमभिहितं तत्रैव परगेहकृताः सर्वाः श्रौतस्मार्तक्रियाः शुभाः निष्फलाः स्युर्यतस्तासां भू
मीशः फलमश्नुते इत्येतत्सर्वमप्यालोच्य गृहारंभप्रकरणं विवृणुते ग्रंथकृत् ग्रामपुरादिस्थानेषु स्वस्य शुभम
शुभं वा गृहारंभनिवेशनं च शार्दूलविक्रीडितेनाह ॥ यद्भं द्व्यंकसुतेशदिङ्मितमसौ ग्रामः शुभो नामभात्स्ववर्गं
द्विगुणं विधाय परवर्गाढ्यं गजैः शेषिते काकिण्यस्त्वनयोश्च तद्विवरतो यस्याधिकः सोऽर्थदोऽथ द्वारं द्विजवै
श्यशूद्रनृपराशीनां हितं पूर्वतः इति ग्रामः स्वस्य शुभोऽशुभो वा इति ज्ञातुं व्यवहारप्रसिद्धं यन्नाम नी
लकण्ठ इत्यादिकं तस्याद्यक्षरं अवकहडचक्रानुसारेण यद्भं राधादिकं न तत्र ततो यद्द्व्यंकादिकं भं राशिः स्या
त्तन्नामभमेवं यस्मिन् ग्रामे नगरे वा वस्तुमिष्यते तस्याप्युक्तगणादि इत्यादिकं यन्नाम तस्याज्ञानाय राशितो
दिक्संज्ञामभे एवं राशिद्वयेऽत्ता नामभान्युरुषु नाम राशेः सकाशाद्यद्वयं स्वग्रामस्य भे राशिः सुखहितो
नवमः पंचमाद्येकादशसंख्योद ग्रामः स्यात् तदा सो ग्रामः स्वस्य फलदाता स्यात् अन्यथा न भवतीत्यर्थः

म
पाटी
१७७
177

यथा नीलकंठस्य वृश्चिकराशिनः पंचमो मीनराशिर्वनस्थानस्य द्विर्वा मयो ग्यः सन् शुभफलदो वा वरणस्यादिः उ
क्तं च राजमार्तण्डे नामर्क्षाद्विसृतार्कादिरभवन्नेतानामः शुभोन्यान्यथेति अथ काकिण्यादीनाम राशिशेषे ग्रा
मः उक्तं च काकिन्यो वर्गमेकीकृत्य वादमृते स्वरादय मेषे पुनर्भूवर्णे नामराशेः प्रधानतेति अथ ग्रामात्पुन
रुत्तमर्णत्वमधमर्णत्वं चाह स्ववर्गमिति वर्गास्तु अकचटतपयशा वर्गाः खगेशमार्जारसिंहशुना स
र्पाखुमृगावीनां निजं पंचमवैरिणाम् अष्टवित्तु क्रमात्तत्र यस्य पुंसो यत्संख्याको वर्गो अकारादिः स्यात्तद्वर्गसं
ख्यां द्विगुणां विधाय कृत्वा परस्य ग्रामस्य वर्गसंख्ययान्वितं कृत्वा नागजैरष्टभिः शेषितमवशिष्टाः काकिन्यो ते
याः पुंसः एवं ग्रामस्यापि स्ववर्गसंख्यया द्विगुणा च कृत्वा नागजभक्तावशिष्टाः काकिन्यो ग्रामस्य भवंति एवमन
योः पुरुषग्रामयोः काकिन्यः स्युः तत्र तद्विवरतः पुरुषकाकिणीनां च विवरमनंतरं तस्मिन् क्रियमाणे यस्य
ग्रामस्य दातृत्वात् पुंसः कर्मणा विशेषेण पुंसो द्रव्यहानिर्ग्रामस्य तु अतिरक्तत्वादित्यर्थः यथा नीलकंठस्य
वर्गः सर्पस्तत्संख्या ५ द्विगुणा यथा १० वरणाद्वर्गः सिंहस्तस्य संख्यया ३ युक्ताः १३ गज ८ भक्ताः
शेषं ५ नीलकंठस्य काकिण्यः एवं ग्रामवर्गसंख्या ३ द्विगुणं ६ नीलकंठस्य वर्गसंख्या ५ युक्ताः ११
अष्टभक्ताः शेषं ३ ग्रामस्य काकिण्यः द्वयोरंतरं शेषं २ नीलकंठस्य दातृत्वात् द्रव्यहानिरित्यर्थः उ
क्तं च स्ववर्गं द्विगुणीकृत्वा परवर्गेण योजयेत् अष्टभिस्तु हरेद्भागं योऽधिकः स ऋणी भवेदिति ॥२६॥ तोय

याङ्कः शीकस्य पवर्गस्य नास्त्य: अकारादिषु वर्गेषु दिक्षु ग्रामादिषु क्रमात् । गृध्रमार्जारसिंहश्वसर्पाखुगजशा
वकाः दिग्वर्गाणामियं योनिः स्ववर्गात्पञ्चमो रिपुः । रिपुवर्गं परित्यज्य शेषावर्गाः शुभप्रदाः । साध्यवर्गं पुरः
स्थाप्य पृष्ठतः साधकं न्यसेत् । विभजेदष्टभिः शेषं साधकस्य धनं स्मृतं । व्यत्ययेनागते शेषं साधकस्य ऋणं स्मृ
तं । धनादिकं स्वल्पमृणं सर्वसंपत्प्रदं स्मृतं । गृह्णीतवगकृतः शुद्धसर्वयोगमहावैरसत्वात् साध्यत्वयः । साध्याव
स्ययोगेण ग्रामादिस्थस्ववर्गवर्गसंख्यापुरं भक्तः । शेषं साधकस्य धनं स्यात् । साध्यसाधकस्य नीलकंठादेवर्गसंख्यां पृ
ष्ठतो न्यसेत् । एवं विशिष्टांकोऽष्टभिर्भक्तः शेषं साधकस्य धनं स्यात् । व्यत्ययेनेति । साध्यवर्गसंख्या पुरतः क्रमाद्वि
शिष्टांकोऽष्टभिर्भक्तः । शेषं साधकस्य ऋणं यथा । साध्यवर्गसंख्या पुरः स्थाप्या पुनः साधकवर्गसंख्या च पृष्ठतः सचैवं
५३ जातास्ते पंचाशत् अष्टभिर्भक्ते शिष्टं ५ धनं साधकस्य विपरीतं स्थापितं यथा ३५ अष्टभक्तशेषं ३ साध
कस्य ऋणं स्यात् । अथ द्वारविशेषमाह द्वाभ्यामिति । द्विजादिवर्णानां तेषु सा क्रमेण पूर्वतः प्राच्यादिदिक्षु गृहे
द्वारं हितं यथा द्विजराशयः कर्कवृश्चिकमीनास्तेषां पूर्वदिशि । वैश्यराशयो वृषकन्यामकरास्तेषां दक्षिण
दिशि शूद्रराशयो मिथुनतुलाकुंभास्तेषां पश्चिमदिशि द्वारं विशेषदत्यर्थः । यदाह अणुराशिपरत्वेन ग्राम
निवासे निषिद्धस्थानानि वसंततिलकच्छन्दसाह ॥ गोसिंहनक्रमिथुनं निवसेन्न मध्ये ग्रामस्य पूर्वककुभो
लिकर्कयोगनाश्च । कर्कीं धनुस्तुलभमेषघटाश्च नाष्टहर्गाः स्वपंचमपरा बलिनः सरेन्द्राः । २ वसतिमिष्टस्य

मु
वा.टी.
१७८
178

ग्रामस्य वस्त्वविभागवत् नवविभागं कृत्वा मध्ये मध्यविभागे गोसिंहनक्रमिथुनैः समाहारद्वन्द्वः नतिस्पूर्वे दि
शाने स्पृष्टदिक्षु बलिष्ठे वृश्चिककन्यादिराशिमेतः पुरुषानवमेषु यथा पूर्वस्यां वृश्चिकः आग्नेय्यां कर्कमीनः द
क्षिणस्यां कन्यानैरृत्यां कर्कः पश्चिमायां धनुः वायव्यां तुला उत्तरस्यां मेषः ऐशान्यां कुंभानवमे दिक्त्रयेः अथ
वर्गाः अकचटतपयशवर्गाः अष्टौ पूर्वस्यां दिश्यारभ्य अष्टदिक्षु बलिनः यथा अवर्गः पूर्वस्यां कवर्ग आग्नेय्यां च

ईशानदिशि शवर्गः ७ स्वामी मेषः मकुं	पूर्वे अवर्गः ८ स्वामी गरुड वृश्चिकराशिः	आग्नेय्यां कवर्गः ५ स्वामी मार्जारः मीन स्वामी
उत्तरे यवर्गः ७ स्वामृगः मे	ग्राममध्ये एते नवस्तव्य वृ मि सि मकर	दक्षिणे चवर्गः ५ स्वा सिंहः राशिः कन्या
वायौ पवर्गः ५ स्वा मीश्वाखः तुला	पश्चिमे तवर्गः ५ स्वा सर्पः धनर्थवृश्चिः	नैरृते टवर्गः ५ स्वा गरुडः कर्कट राशि

वर्गः दक्षिणस्यां टवर्गो नैरृत्यां तवर्गः पश्चिमायां पवर्गो
वायव्यां यवर्ग उत्तरस्यां शवर्ग ऐशान्यां बलीत्यर्थः कीदृश
वर्गः स्वपंचमपरः स्वस्मात्पंचमः परः शत्रुर्येषां ते यस्य
वर्गः पूर्वस्यां बलीतेन पश्चिमायां द्वारेनिवासो वा न विधे
यः एवं कवर्गादीनां आग्नेय्यादिसप्तदिक्षु बलित्वम
प्रयोजनं तेयं यत्कर्तमनुहूर्तमार्तोडे नाम दोहि स्वर्णाकादिमवगतो ग्रामः शुभोन्यान्यथा नकोणे तभवांशुभं
निवसतो दोषः परेषामले कन्याकर्किंयमस्तुलाक्रियचंद्रकोष्यो उजोयाम्यतो मध्ये नवसंत्यर्थे दकुंग
भावर्गः स्वरोजस्विनइति उजस्विनोबलिनः कोष्याद् पश्चिमः वक्रोद्वारो यथा २ अथ दृष्टच्छद्रेष्ट्या याघाम्पि
भूम्याविस्तारायामा विन्दवज्रेयन्दवशाह्वीर्यनचारु ॥ एकानितिष्ठैदहनताहिनिष्याद्रूपानि तेष्टायदहतेन्मनोगे

२

युक्ता येनै स्यापियुतावि भक्ता भूपाश्विभिः शेषमितोत्र हि पिंडः २ स्वेष्टायनन्तत्वभयो यदेर्घ्यं तन्त्याहिस्तृतिर्वि
स्तृतिः ए स्यदीर्घता यत्र गृहं कर्तुं मिष्टं भवति साभक्ता नाग्र का येत ः संभवति समवत्तरेश्र य्यशास्यायनेकभेदेन
नत्र यदेवनतत्रे स्वव्यवहारनान्वाराणिक्त दादिके सर्वे दयन्या रिवविं नयेदि निवसिष्टाक्ते ः विवाहोक्तमलो
पकविधिना शुभदं स्यान्न देवत्व ष्टभेक स्यापकल्पितमन्दे तेनदत्ता गुणिता हि तिथ्यः कार्या तता नृपैणोनितो
यदृष्टाया ध्वजादिकस्तेन हता ३ङ्केनागयकाशीतिस्त्याप्युक्ताः कार्याः ततो यनेः समदर्यभिरपियुक्तास्तताभू
पाश्विभिः शेरशाधिकहि शतावि भक्तास्तता भक्तं संमितय क्रोयंतन्मितः पिंडः देत्र फलं स्यात् स्वपिंडः स्वेष्टाय
नत्वभवः स्वसु गृहकर्तेरिष्टं यत्र तत्रे ष्ट व्यायस्यताभ्यां भवतीति ताहशः स्यात् श्रथ सपिंडे विस्तृति त्कल्पि
तविस्ताभक्तो दीर्घता स्यात् उक्तं च साम्म्यं ये नृपाह भिर्विनिहतो भवनस्य बन्धोनदत्त्वमिष्टमिह युग्मया
वेदैर्निघ्नं पक्षीकृतं नरसन्तिशैर्ककर युग्मिष्टं स्यतो भवति मध्यगृहस्य पिंडः इति श्रत्रोदाहरणं नीलकंठस्या
नुरायानत्त्वेनस्यो हि एणासहमेला पकः संभवतीष्टं भे वा हि णीकल्पितं विषमथापुः सिंहः कल्पितस्तती यः २
रेखात्वं ४ यकेतुनि ३ श्रनेन हि तिथ्या १५२ हतं ४५८ रेष्टाय ः ३ नृपोनितः २ श्रांभ्वारोङ्क नागा ८० हता १९२
यतेर्युक्ता ९१८ यैनैर्युक्ता ९३५ श्राया ष्टकमध्ये विषमा या या या या रहरितायः ३ भूपाश्विभिर्विभक्ताः शेषमिद
मेव क्षेत्रफलं २०३ गृहस्य श्रय कल्पितं दैर्घ्यं २५ श्रनेन भक्तो लब्धो विस्तारः श्रयं कल्पितविस्तृतिः ७ ।

म
वारी
८२

179

भक्तोलब्धं दैर्घ्यं २७ यदा द्वारकायां तेन गोपिराजः वि॰॰ व्येकाय गोभूहृति भयुजि फलं गोपिराजो भू शेषान्मा
येवाह्राहि गंगेत्रष्टयुनससहितं हक ग्राह्म नाथाविखेवा णां मिश्रा हिनागाह्व तिभूतिमिति शाय्याकृतीन्दुभूत
नायष्टं कन्मानु वर्णं वविकृतिद्विवायक हृती भेंडकाहरति अस्यार्थः गोपिराजो व्येकायागो भूहृति भयुजि
सतिभशेषात् पिल्यग्राह्विहृताहव्यनावा वाविश्वादयः फलस्यादित्याहृति योजना वि गतव्येकाय स्मात् सव्ये
का। सवासावायस्य व्येकायाभ्रजादिति शाय सवगोभवस्य १९ प्रवाहृतिः परस्परगुणने व्येकाय गोभूहृति
स्वभेव व्येकाय गोभूहृतिभेत योयुक व्येकाय गोभूहृतिभयुक नस्मिंसति भशेषाद्वे २७ भक्तेमति यच्छेषन
हि लब्धनामान पिण्ड्य ग्रहि हृताद्याष्ट गुणितात् हक शेषकृत्या व्याय कविंशति विश्वे त्रयोदशा न्यादशा शूद्रदेन
फलसाय मिश्राय सहितं सप्तादि हृवदति गोपिराजः अयोदाहरणं पूर्वोक्तं इष्टायः ३ व्येकः २ गो भूहृति
३८ इष्टेरो हि गुणितत्संख्या ४ युते ४२।१।२।३।४।५।६।७।८।९।१०।११।१२।१३।१४।१५।१६।१७।१८।१९।२०।२१।२२।२३
२४। २५।२६। २७ कोष्ठयुता: अष्टहृता: ४२।१।२३।५।२४।१६।८।२३।१५।१।३।२२।१४।८।२५।१३।५।१।१२०।१२।४
२३।१५।७।२६।१८।१०।१६।१८।१०।१५।१५०।१५३।१२६।६४।२९।१५२।६६।२४।१७।१२।४८।१२०।१३।८।७।२।८
१९०।१५८।३४।२८५।१२०।१५८।१२०।८।१४४।१८० एतत्तदेव फलं अस्माद्भैः २७ शेषं २५ एतत्संख्याकफलं २५ अ
ह्निः। ५ हृते २०० इष्टायसहितं २०३ इदं देवेष्टाय नक्षत्रभवं देवफलम् एवं समये वस्त्रथम हाशूद्रप्रमाणं श्येम

ह्यावेति वा इत्यथ वा द्व्याय सहितं जातं यत्फलं तत् । अष्टिर्द्वेष्टेन्द्र प्रेतेसुरर्षि स्वर्दशाश्च सुरिष्टिं दृशाः षोडशापि कह्निया

ती २१८ तयाहतो गुणितो यः स्यात्पृथक् हिआयेकसेनयुक्तं कार्यं तन्मनोभीष्टसमहाशृहद्वे तेषफलं स्यात् इत्य

र्थः ३ अथेष्टं दर्शयन्नाचार्यो ध्वजायायान्वदन्नायैवर्णपरत्वेन विहारनिवेशानन्नुपजात्याचाह ॥ आयाध्वजो धूम्रह

रिश्वगोखरेभध्वांक्षकाः पिंडे हृतेष्टशेषिते ७ ध्वजादिकाः ध्वजे सर्वदिशि मुखं कार्यं हरोग्रहे वेयामेन्द्र वेतथा प्रा

च्यां वृषे प्राग्यमे याम्ये गजे पश्चिमवायव्याउदक्पूर्वयमे विज्ञाहितः ४॥ पिंडे तत्क्षेत्रफले अष्टशेषिते अष्टभक्ते सति यदवशि

ष्यते तत्संख्यामिता आया ध्वजादिकाः स्युः ध्वजः धूम्रो सिंहो हरिः सिंहः श्वा कुक्कुरः गो वृषः खरो गर्दभः इभो

हस्ती ध्वांक्षः काकः ध्वांक्ष एव ध्वांक्षकः स्वार्थे कः यदाह विश्वकर्मा विस्तरेणाहते दैर्घ्ये विभजेदष्टभिस्तत

यच्छेषं समभेदाया ध्वजाद्यास्तस्युरष्टधा ध्वजो धूम्रो हरिः श्वा गो खरो भो वायसोष्टमः पूर्वादिदिक्षु वाषाना

ध्वजादीनामवस्थितिरिति सर्वदिशीति ध्वजाख्ये आये आगते सति सर्वदिशि दिक्षु तत्रापि गृहद्वाराणि

कार्याणि स्युरित्यर्थः हरौ सिंहाये पूर्वोत्तरदक्षिणात्तरदिक्षु द्वाराणि स्युः न पश्चिमदिशीति तथा वृषाख्ये आये

प्राच्यादिषु एव मुखं नान्यदिक्षु गजाख्ये आये प्राग्यमयोः पूर्वदक्षिणदिशोर्गृहमुखं कार्यं स्यात् यदाह श्रीप

तिः अष्टाहते गृहे क्षु चायाविषमाः प्रशस्ताः स्वस्थानगाः सर्वगतो ध्वजस्तु ध्वजो हरो वा वृषेत वृषो हि

नान्यत्र समाश्रितः स्यात् वसिष्ठोपि विषमायाः शुभाये वसमायाः शोकदुःखदाः ध्वजसिंहौ वृषो गजे

म॰
वाटी॰
१८०
180

ऐते गवि शुभप्रदाः वृषेन पूजिते न्यत्र ध्वजः सर्वत्र पूजित इति अस्यार्थः ध्वजः प्राग्वत् स्थित्यानन्तरं पूजितः पश्चात्परं तद्द्वा
वपि दक्षिणस्यामपि पूजितः तौ च गजे तौ ध्वजस्तिष्ठावा यो गजे उत्तरस्यामपि प्रशस्तो स्वस्थाने किं मृत यते ध्वजसिंह
गजाख्या आयाः पश्चिमायामपि पूजिताः किं न स्वावस्थित्या पश्चिमदिशि पर्व ध्वजस्तु सर्वत्रैव पूजित इति अनयोरी
त्यादि आया यत्रावस्थिताः स्युस्तन्नत्सैव दिक्षु द्वाराणि स्युरित्यर्थः अन्यग्ध्वजे द्वारं मध्यात् प्राग्पूर्वे द्वारावुदक्
स्याद्धि रदेव याम्यामिति श्रीपतयुक्तेः महेश्वरोपि सर्वद्वारहृद्ध्वजो वरुणादिग्द्वारं वह्निवाद्विः प्राग्द्वारो वृ
षभो गजो यमस्त्वैरणा याम्याल्वः स्यात् शुभ इति आया नोद्धयोजनमाह विश्वकर्मा वृषं सिंहं गजं चैव खेटकर्पट
कोटयोः द्विपः पुनः प्रयोक्तव्यो वापीकूपाराममेषु च मृगेन्द्रमासने दद्याद्ध्वजेषु गजोऽपुनः वृषं भोजनपात्रेषु
छत्रादिषु पुनर्ध्वजं अग्निवेश्मसु सर्वेषु गृहे वह्न्युपजीविनां धूम्रं नियोजयेत् म्लेच्छानेऽन्येच्छाद्विजातिषु ख
रो वैश्यागृहे प्राप्तो ध्वांक्षः शेषजन्मेषु च वृषसिंहौ ध्वजश्चापि प्रासादेषु रवे शुभम् इति श्रीवसिष्ठः गजाये
वा ध्वजाये वा गजानां सदने शुभे अश्वालये ध्वजाये वा खराये वृषभेऽपि वा उष्ट्राणां मन्दिरे कार्यं गजाये वा वृष
ध्वजे पशुसद्म वृषाये वा ध्वजाये वा शुभप्रदं गाव्यासद्वृषभः शस्तः पीठे सिंहः शुभप्रदः अमत्रच्छत्रवस्त्राणां
वृषाये वा ध्वजेऽपि वा पादकोपानहो काये सिंहाख्येप्यथवा ध्वजे उक्तानामप्यनुक्तानां मन्दिराणां ध्वजः शुभ
इति अथ ब्राह्मणादिपरत्वेन द्वारनिवेशेन उच्यते अथ वेति हि जातिनः ब्राह्मणादिवर्णविभागेन पश्चादिन

दिदिक्षु गृहद्वारं स्यात् यथा ब्राह्मणस्य पश्चान्मुखं गृहद्वारं क्षत्रियस्योदग्दिशि वैश्यस्य पूर्वस्यां शूद्रस्य या-
म्यां दक्षिणस्यामित्यर्थः श्रीपतिः भृगुः प्रतीचीमुखमग्रजानां उदङ्मुखं भूमिभृतां च सिद्धे विशां पूर्वमुखं च
दन्तं गेजन्तु शूद्रस्य याम्याननमामनंति इति टोडरानन्दे च्यवनः ध्वजेपरस्यां विशाणे राजतो सिंहे पुरद्वमुखे
गजे च शूद्रस्य याम्यां स्यवृषे पूर्वामुखं विशा इति ध अथ गृहारंभो विशिष्यकालनिषेदमुपजात्याह ॥ गृहे
शानन्त्रीसुखवित्तनाशो केन्द्रीज्यशुक्रे विबले खनीचे कते:स्थितिर्नो विधुवा स्वनीचे भे शत्रुःस्थिते ह्यष्टगा।
तेष्वनिःस्यात् ५॥ चेद्गृहस्वामिनो जन्मराशिवशाद्दुष्टे विबले निर्बले अस्ते अस्तंगते वा नीचे नीचस्थि-
ते वा शुक्रादिके ग्रहे सति गृहेशादिनाशः यथा सूर्ये निर्बले नीचस्थिते वा गृहेशस्य नाशः इंदौ चेदिनिर्ब-
ले अस्तमिते नीचगते गृहेशस्त्रीनाशः इज्ये गुरौ नाहशे सति गृहेशस्य सुखनाशः शुक्रे निर्बले नीचे वस्यस्तं-
गते वित्तनाशः यदाह श्रीपतिः रवौ गृहस्याग्रहिणी शशांके धने सिते देवगुरौ च सौख्यं विनाशमाया-
ति बले न हीने नीचास्थिते वास्तमुपागते चेति वसिष्ठस्तु नैवमेवाह नीचशत्रुगते जीवे शुक्रे वाथ दि-
वाकरे शशांके वास्तंगते गेहमतिनिःस्वप्रदं स्यादेतिइदमस्य स्याप्युपलक्षणं अत्रास्तंगतत्वं किं क्षितिज
सन्निधिकृतमस्तंगतत्वमुत सूर्यकृतं विवादितमिति उच्यते क्षितिजसन्निधिकृतमस्तंगतत्वं तद्दैनंदिनं न
स्वसूर्यादिसकलग्रहसाधारणं तस्मिन्विवक्षिते अस्तंगतत्वं विशेषेणानर्थकं स्यान्नैव वा शयेन वास्तुशास्त्रं

मु. पठ्यते श्रुतन्दोषोऽत्र न ग्राह्यः श्रुतिदैवसिकोऽब्धयैः नाम्नदोषाः सदा धन्देन मैत्रे ज्ञस्य नीवृतेति अन्नस्य वेदस्यक
वाटी. त्रितिति विधुवास्तनो भे यत्नदात्रेदिनवेदस्तद्धि पूभे यन्मृहस्य विस्तारायामव शाङ्गत्य त्रभेत मृहभे तस्मिंश्च रश्मि
१८(तेसे मखेस्थितेसति कर्तृगृहनिर्मातुस्तस्मिन् गृहेस्थितिर्निवासो न स्यात् पृष्ठगते वा विधुवास्तनोभे सति व
181 नि: उक्तं च वास्तुषणसे क्रूरं चन्द्रस्य वास्तोः स्वस्थाग्र पृष्ठेन यास्यते इति श्रीपतिनाप्येतद्वेदस्य फलमुक्तं तत्पाकवे
नेव गृहं प्रवेश्य ऊर्ध्वादमेतत्र न जानकर्ता पतंतिवोन्यानि वृषपृष्ठसंस्थेयत्नेन तस्मादिदमत्र वितर्कमिति पूर्व।
स्थितत्वं लग्नवशात्केचिद्व्याचक्षते: यथाह: मखेगृहेकर्तृर्विलग्नस्य स्वन्द:पुरःस्थितो भवति दक्षिणमुखे
गृहे वामग: पश्चिममुखे तत्पृष्ठग: उत्तरमुखे तद्दक्षिणग: एवं दधामस्य क्षेत्रदोदक्षिणमुखे गृहे सेमख:प
वेमखोऽस्वापिदित्तपृष्ठगतत्वं सेमखत्वं च ध्येयं तत्राद्यौ दक्षिणवामगत्वं वेदस्य समीचीनत्वं स्पष्टं: रत्नमा
लाटीकाकारो महादेवस्तु दिग्द्वारभक्रमेण संमुखादिवत्स्य निव्याख्यानात यथा गृहद्वारे यस्यादिं।
पितिविधिमितत्वं हि गृहं तत्रपृष्ठगृहारंभो न कार्य इति अर्थाद्दिग्दलवशेन वामदक्षिणयोश्चन्द्रे गृहारंभस्य मु
खेन कार्य: यदाह श्रेष्ठ शांभ:धनलाभ:प्रवास:स्यादापृष्ठेशोभमेयं क्रमात् दक्षाग्रवामपृष्ठस्य गृहेभेतानि
शाके इति केचित्तु सूर्यस्यैवमेवफलमाहु: यदाह मूलशोभेवभानाव्यपितष्ठैवस्यादपि केवनतदन्ते यन
लाभो मतिर्व्याधिर्वित्तनाशो विलोमतइति नदंतरे विदिक्षु विलोमत ईशानवायव्यनैऋत्याग्नेयदिक्षु क्रमे

णायनलाभोमरणेव्याधिरविनाशःफलंस्यादित्यर्थः इदंदिग्द्वारनक्षत्रवशेनवक्तफलनतल्लग्नायत्वा
हस्तनक्षत्रविषयं यत्रकेवलमपोभनागृहायलग्नेऋक्षेषुयत्रऋक्षेवचन्द्रमाः सकालसम्भवोप्ययंक्र
त्रिकादिक्रमएव वामदक्षिणभागेनप्रणसंक्रांतिकारके अग्रपृष्ठेनदानबंधयदीक्षेक्षयस्तात्मनः ।
ऋक्षंचंद्रमावास्तोस्यअग्रपृष्ठेनयथास्यतेइति सूत्रैवंसाधसफलमभिधायव्ययकथनपूर्वःसमशा
कमानेनसफलमुपजात्याह ॥ अनागतंष्टव्ययईरितोसौध्रुवादिनामान्तरयुक्तपिंडः नष्टागुणोविद्ध
भूतांतम्भूणसंख्याभवेयुर्नशुभोनकोत्र ८॥ आगुक्तदिशाकल्पितेनयद्गृहेनतगौरवष्टभिस्तष्टंभक्तावशि
ष्टंव्ययईरितः यथारोहिणीमनागतंष्टंषष्ठयंभवव्ययःअसौव्ययः ध्रुवादिनामान्तरयुक्तध्रुवादी
नांनामान्यपूर्वैवबक्तति यत्संख्याकानिदिक्षुद्वाराणिविकीर्षितानितदनवधेनयदागतंध्रुवादिगृह
नामतदक्षरसंख्यायायुक्तः ततःसपिंडःआगानीनापिंडःयुक्ता गुणोस्त्रिभिस्तष्टोभक्तावशिष्टपकादिस्त्रिषा
षोणेष्वमराजसंतकाखयोगास्तुः अत्रगृहावंभेष्टंनकोयमाख्योशकोनशुभः अत्यादिद्राजानोम
भफलदोयताह्स्रीपतिः यिसंख्यात्रिभक्तेवसुभिश्चयः स्यादङ्कायमनेव्ययमालयमते वशात्रिनेते
त्रफलेगृहस्यध्रुवादिनामान्तरमिश्रितेच त्रिभिर्विभक्तेकमशोयाकःस्यादिन्द्रायमोभूपतिरेतकोसते
इति वास्तुशास्त्रेपिमूलराशौव्ययेविशेगृहनामाक्षरैःपूर्वः पुनर्हरेत्रिभिर्भागंयक्षेषंसोंशकोभवेत

मु.
वाटी.
१८२

182

इन्द्रायमस्त्रराजास्याद्यमांशोनैववामृतइति मूलवाषिदेवत्रफलं, ८ अथविवक्षितशालाधुवान्यनेप।
यावकात्विनाउद्गभाह ॥ दिक्पूर्वादितःशालाधुवाभेहोकृतागजाः शालाधुवांकसंयोगःसैको
वेश्मधुवादिके ७॥ पूर्वादितोदिक्षशाब्दादिषुचतसृषुदिक्ष्विमेशालाधुवाःस्युःयथा प्राच्योहाति
विकीर्षितेशालाधुवांकयकः १ दक्षिणस्यांहो २ पश्चिमायांकृताः ४ उत्तरस्यांगजाः ८ अथदिक्रतेन
यावेत्तिहासएकोहौत्रीणिचत्वारिवाविकीर्षितानितावन्तांशालाधुवकानांयोगःकार्यः सैकःयक

१	ऽऽऽऽ	५	ऽऽ।ऽ	९	१३	ऽऽ॥
२	।ऽऽऽ	६	।ऽ।ऽ	१०	१४	।ऽ॥
३	ऽ।ऽऽ	७	ऽ॥ऽ	११	१५	ऽ॥।
४	॥ऽऽ	८	॥।ऽ	१२	१६	॥॥

गुणकःसन् धुवादिकेवेश्मगृहस्यात् अत्रोपपत्तिर्नीलकंठगुरुत्वर
णाश्रमादात्तुउच्यते यथाश्रीलावत्यः गुरोरधोलघुःस्थाप्यःपुरस्ताद्वद्ध
वान्न्यसेत् गुरुभिःपश्चिमंपूर्वंसर्वलघ्ववधिर्विधिः यद्यपिसामान्यतो
यस्मिन्कस्मिंश्चित्प्रस्तारेसंभवति तथापिगृहेष्वदिग्ज्ञानाविद्यमानादिह्येवज्ञानलंघनाशस्यांकेदिशांत्ववव
तिष्ठाचत्वारएववर्णाःस्थाप्याःततोगुरोरधोलघुःस्थाप्यइतिविधिःकार्यःतत्रप्रथमातिक्रमेकरणाभा
वादाद्यगुरोरेवाधोलघुःस्थाप्यइतिविधिःकार्यःतत्रप्रथमातिक्रमेकरणाभावादद्यगुरोरेवाधोलघुः
स्थाप्यःएवमग्रेपि गुरुलघुस्वरूपोपपत्तिरत्राकेरसानत्वाद्विसर्गांतोदीर्घोगुरुःपक्षद्वयःवापदांतेत्व
सौस्वत्रकोत्रेयात्पामात्हकोलघुत्तः गुरुर्वक्रःलघुऋजुःमामात्रकोलघुरितिश्रमो गुरुवक्रोलघ्वा:

यथान्यो गुरुर्व्यतिरिक्तो लघुर्मात्रिक एकमात्रः ऋजुः सरलः ऊर्ध्वं दण्डाकृतिर्लेख्यः यथा तत्र एणेश्वक्रारो
यथा ऽत्र दिशा चतः षष्ठ्या क्रमेण लघुस्थाने ऽलिन्दः गुरुसमाश्रिते प्रदक्षिणे गृहद्वारादलिन्दं देशषट्कं दार
ति गृहभेदाः स्युरिति शेषः अलिन्दः अलिन्दशब्दे न शालाभित्तौ वीथ्यां यथा गमतिका जलकाष्ठतो गतं
सम्मुखो क्रियते सा शेषे स्युस्त्वलानन्दः इति शालाख्यमितिमहादेवः अथ प्रथमेणालिन्दाव हि द्वारे अथ को
पके ऽस्त्यमवः तत्र चतुर्गुरोः प्रथमभेदस्य लघ्वभावादि द्वाराभावाद् इह ध्रुवं स्वतन्त्रं गृहं कोष्ठीसह शस्यात् अ
शेषेषु पंचदशसु भेदेषु लघुस्थानावस्थित्या ततद्दिग्द्वाराणि स्युः तत्र प्रथमं द्विनापि प्रस्तारे ऽलिका यदे
न शालाध्रुवानानयति स्म यथा एकस्मिन्नेव द्वारे विवक्षिते पूर्वदिशि शालाध्रुवांकः १ एवं दक्षि
णदिशि चापि २ पश्चिमदिशि ४ उत्तरदिशि च ८ उत्पद्यते तो ऽष्टैतेन चतुर्दिग्द्वारतानार्थं प्राप्य
यद्यद्दिग्द्वारे स्यात् तत्तद्दिक् शालाध्रुवयोगः कार्यः यथा पूर्वस्य पश्चिमायो द्वारे भोषे शालाध्रु
वौ ।१।४। अनयोर्योगः ५ सैकः ६ एवं पूर्वदक्षिणोत्तरदिशि द्वारे शालाध्रुवांकयोगः ११ सैकः
१२ प्रस्तारे लिखितक्रमेण उत्पद्यते उपलभ्यते ध्रुवादिसंज्ञास्तु चतुर्गुरु प्रस्तारे समारभ्याक्ताः तत्र
चतुर्गुरोः प्रथमभेदस्यादिग्द्वाराभावेन गणनाभावात् तस्याग्रसंख्याशून्यत्वात् समभूदिस्येकोयोगः कार्यः
सर्वत्र यथा पूर्वपश्चिमयोः ६ कांतारव्ये गृहे ज्ञाते एवं पूर्वदक्षिणोत्तरदिक्षु १२ एतदाख्ये गृहे दिक्

म.
वारी.
१८३
184

तद्रूपे १८ विजयाख्यं गृहं। अनयैवोक्तं दिक्षु पूर्वादितः स्मादि ८ अथैवं विवक्षितध्रुवानयनमभिधाये
दानीं ध्रुवादीनां नामान्तरसंख्योपयोगं वक्तुं छन्दसाह ॥ निष्क्रौ [illegible] गोत्रदशकेन नामान्तरत्रयम् भ
द्रा [illegible] विशेषहीनं गेहाय: ४ दिक्षु पूर्वादितः स्मादिनायके शमध्रुवादिसमागतं तस्य पालाध्
वाकसंयोगा: सैकरस्त्रककदिगाशसंख्यामवधारयेत्‌ सा चेत्संख्या पंचदशी द्वादशी अष्टमी षोडशी नवमीच।
काटशी चतुर्दशी वा स्यात्तदा गृहं नामान्तरत्रयात्मकं स्यात्‌ यथा १५।।२।८ ९।।२।। ।१४ अत्रैवोप्येवान्त
राणि पुनः शेषसंख्या प्रथमा द्वितीया वा चतुर्थी पंचमी षष्ठी दशमी तृतीया त्रयोदशी वा स्यात्तदा गृहं नामद्वयो
अन्तरद्वयात्मकं स्यात्‌ यथा ।।२।४।।५।८।९।।३।।२ अत्रैव चतुरपुनः सा संख्या सप्तमी स्यात्तदाद्य यस्मान्
न्तरं गृहं नाम यथा ७ चत्वार्येतानि एवं त्रयं तस्य यद्येषु ध्रुवधान्यायतनगणेनामूलमिनिनात्र मूलवाम
समानाधिकस्योपन्यास: ४ अथ तेषां ध्रुवादीनां षोडशगृहाणां नामान्यार्यागीतिच्छन्दसाह ॥ ध्रुवधा
न्यजयनन्दाः खरकान्तमनोरमसुमुखदुर्मुखोग्रं अहिततथनदनाशो वक्रांद्रविपुलविजयाख्यं स्यात्
आर्यागीत्याख्यं छन्दः तल्लक्षणं वृत्तरत्नाकरे आर्याप्रथमार्धे यदि गुरुणैकेन निधनेऽधिके इतरेतद्वत्रि
खिलं यदीयमुदिते यमार्यागीतिरिति यथा ८।८।८८।।८।।८।।।।८।।८८। पूर्वार्धे उत्तरार्धे ॥ ८८
।।८८८८।।।।।२।।८८। अत्रार्यासामान्यलक्षणमप्युक्तमन्येयं विशेषलक्षणसामान्यलक्षणाधीन

१०

नात् निधनेप्रांतेध्रुवेत्यादिपद्येस्पष्टार्थमेवतथापिविविच्यते यथाध्रुवधान्येजयनन्दाविति चेमते
तरयोगद्वंद्वः खरकांतेत्यादिसमाहारद्वंद्वः उग्रेक्रूरेश्रहितेविपुलाख्येविपुलविजयाख्येमिति
समाहारद्वंद्वः ध्रुवमूर्ध्वमुखेप्रथमेगृहे ऽऽऽऽ धान्येपूर्वद्वारेद्वितीये ऽऽऽ जयेदक्षिणद्वारेऽ
ऽऽतृतीये नन्देशाग्दक्षिणद्वारेचतुर्थे ऽऽ खरेपश्चिमद्वारेपंचमे ऽऽ।ऽ कांतेशाकप्रलग्द्वारेष
ष्ठे।ऽ।ऽ मनोरमेदक्षिणपश्चिमद्वारेसप्तमे ऽ।।ऽ सुमुखेशाग्दक्षिणपश्चिमद्वारेष्टमे ।।।ऽ दुर्मुखे
मन्तरेनवमे ऽऽऽ। उग्रेक्रूराख्येपूर्वोत्तरद्वारेदशमे ।ऽऽ। अहितेविपुलाख्येदक्षिणोत्तरद्वारेमेकादशे
ऽ।ऽ।दनदेपूर्वदक्षिणोत्तरद्वारेद्वादशे ।।ऽ। नाशेनयाख्येपश्चिमोत्तरद्वारेत्रयोदशे ऽऽ आक्रन्दा।
ख्येआग्नेयपश्चिमोत्तरद्वारेचतुर्दशे ।ऽ।। विपुलाख्येदक्षिणपश्चिमोत्तरद्वारेपंचदशे ऽ।।। विजयेच
तुर्दिग्द्वारेषोडशे ।।।। इतिनन्वध्रुवाद्यद्वारसंख्याज्ञानेनप्राकरणेनैवोक्तातत्किंपुनर्ध्रुवादीनांनामग्र
हणेनउच्यते नामसहशफलसूचनार्थंतदुपायात्तनमन्यथाद्वारानंतरेणध्रुवाद्यद्वारसंख्यायोगे
उक्तेकोहपानोगृहाणांविधिनिषेधोवानतिष्ठीयेत तस्माद्येषांशुभफलदानिनामानितेषांगृह
णेग्रहणंयेषांवाशुभंफलंतेषांत्यागोविधेयइतिनिष्कृष्टोर्थः उक्तंचवसिष्ठेन ध्रुवसंज्ञेगृहेनायेयम
धान्यसंज्ञकेपदे धान्येधान्यप्रदंतृणांजयमाहिजयप्रदे नन्देस्त्रीहानिदंनन्नेखरेसंपद्विनाशनम् ॥

मु.
वाटी.
८४
१८५

पुत्रपौत्रप्रदं कोणं स्त्रीप्रदं स्यान्मनोरमं ऋणवह्निभोगरोगार्त्तं तेउमृत्युविभवप्रदं सर्वदुःखंप्रदं कूवं विप
त्तं शत्रुभीतिदं धनदं धनदं गेहं तत्वं सर्वदत्वप्रदं श्रीकान्तं शोकजनं विपुलं श्रीयमः प्रदं विपुलं
नामसदृशं धनदं विजयाभियमिति ॥ अथ केषांचिन्मतेन गृहस्यायादिनवकमयजातिकापथ्याव
न्यामाह ॥ पिंडे नवांकाग गजाग्निनागनागाब्धिनागैर्गुणिते क्रमेण विभाजिते नागनगांकु
र्यनागैर्हृते तिथ्यर्क्षेलवभानुभिश्च ९ ॥ आयेवारांशकोद्रव्यमृणमर्क्षतिथिर्युतिः आयुश्चायगृह
शान्नरस्य गृहभेशमतिष्ठदं ॥ पिंडे क्षेत्रफलेन नवधा स्थापिते क्रमेण नवादिभिरंकैर्गुणिते क्रमेण च नाग
तिथिभिरंकैर्भक्ते सति यच्छेषं तदायादिकं स्यात् यथा क्षेत्रफलं नवभिर्गुणितं अष्टभिर्भक्तं शेषमायः
स्यात् पुनर्नवभिर्गुणितं सप्तभिर्भक्तं शेषं वारः पुनः षड्भिर्गुणितं नवभिर्भक्तं शेषमंशकः पुनरष्ट
भिर्गुणितं द्वादशभिर्भक्तं शेषं द्रव्यं स्यात् पुनस्त्रिभिर्गुणितं अष्टभिर्भक्तं शेषमृणं पुनरष्टभिर्गुणि
तं सप्तविंशत्या भक्ते शेषमृक्षं पुनरष्टभिर्गुणितं पंचदशभिर्भक्ते शेषं तिथिः पुनस्त्रि
भिर्गुणितं सप्तविंशत्या गुणितं शेषा युतिर्योगो विष्कंभादिः पुनरष्टभिर्गुणितं क्षेत्र
फलं षष्ठ्यभागुणितं १२० भक्तं शेषमायुः स्यादिसंख्यं नवभागेः २०३ नव गुणिता
१९ २१ अष्टभक्तो लब्धं २२० शेषमितं स्वायोजानः पर्वसंख्यानीता ३ मावाराः

गुणिते

९	आयः	८
९	वारः	७
६	अंशाः	१२
८	द्रव्यं	८
२	ऋणं	२०
८	ऋक्षं	१५
८	तिथिः	२०
८	युतिः आयुः	१२

शेषकाः ५८२४ ४ अरणे ९ ऋक्षं ४ रोहिणी तिथिः ४ चतुर्थी योगः २ प्रीतिः ७ आयुः ९४ उक्तं चन्द्रगो-
कलेष्टगुणाष्टनागगजलधिव्याले ६।५।६।८।७।१।८।८।७।८।४।८ हृतेभूफलनागाङ्कदिवाकरासभतिथी
योगैः स्वसूर्यैर्भजेत् आयं वारमृक्षांशार्कं पंचस्थानातो तिथिर्वितयेद्योगो वायुरितीह शेषकपदे भागोक्ते
तेतिकैरिति वसिष्ठादिभिस्तु षडेते निर्दिष्टाः यदाहुः विस्तारायामगुणितं गृहस्य पदमुच्यते तस्माद्ध
नाङ्कनागपक्षवासवारामनवांशकाः गजरामाङ्कवस्वङ्कऋक्षाभिर्गुणितान्यतः सूर्याद्याब्दहतेभ्यश्च
कविभक्तादवशिष्टकाः संपूर्णाः शुभदास्तेते स संपूर्णास्तु निष्फला इति पदे तेन फलेऽस्य यनेऽरणे
ऽयपतिः शुल्कान्तोभाजकान्तो वस्यायामप्रष्टाङ्केव वाराः सप्तैव प्रोक्तानेव पुनरणे नक्षत्राणि सप्त
विंशतिः तिथयः पंचदश योगाः सप्तविंशतिः परमायुर्विंशत्यधिकशतमिति अथैषामायादीनां श
योजनमुच्यतेऽस्माभिः आयस्तावत् विषमायः शुभायैव समायः शोकदः स्वदः इति वसिष्ठोक्तेः वारा
णां च सूर्यभौमवाराः शोकदाः सदा वह्निभयप्रदः शेषग्रहाणां वाराः सर्वेऽभीष्टसिद्धिदा इति प
ञ्चाङ्गगणितेन नागताभौमवाराः सोपि निंद्यः तद्राशी मेषवृश्चिकौ तनिन्द्यौ तदेशाय अस्मिकास्मिंस्त्विह गृहे
मेषवृश्चिकनवांशावपि निंद्यौ एवमन्यग्रहयोरपि शुभनवांशानां च गृहस्यागतेभ्यः न तु हि राश्यात्मके
यदि नवांशावशान्नक्षत्रानुक्तसर्वत्र गृहइतियथा कृत्तिकाहिरण्यात्मिकानेत्रे कावशेषेमेषः स्यादिशे

मु.
वाटी.
१८५
185

षेवृषः सिंहोऽपि द्वितीयाधिके शेषे मिथुनमन्यथा वृषः पुनर्वसौ वसौ शाकत्रयं यावन्मिथुनेऽन्यथा कर्कः
एवमुत्तरफाल्गुन्यादिषु द्विद्विपादात्मकेषु ऊहनीयं विद्वद्भिः नन्वसन्दिग्धेषु एकपादात्मकेषु स्वाश्विन्यादि
षु यत्नशोयोऽस्य यत्नाधिक गृहे हृष्टे निर्धनाय ऋणाधिकमिति नन्वेतस्य वियस्त्वदाति पत्राशशत्तराप्तेति
कृत्तदा नियतात्वात्तारकात् सर्वथा नियतत्वशङ्का विवर्ज्यात्तारकाभवनं निर्माणमात्रवशदे उवैन्नत्वात् नगोमे
हाद्दुःखमागन्वाधिभाग्यमेवेत् अयमर्थः गृहनक्षत्रादिनं भेयत्संख्यं तन्नवभक्तं अवशिष्टतारा विपत्ताराधिक
सुखेनदानिष्टा स्वदिने गृहारम्भं न कुर्यात् अन्यस्मिन्दिने शुभताराशु गृहारम्भं कुर्यादित्यर्थः इति केचित्
अपरे तु गृहकर्तुर्नाम नक्षत्राद्गृहभं गणयेत् नवभक्तमवशिष्टे विपत्ताराधिके स्यात् तदा तद्गृहे स्यानिष्टमन्त्या।
याशुभमिति यदाह कश्यपः देहेऽङ्गः खेत्तृतीयस्थं पंचमस्थं यशः क्षये आयुः क्षये सप्तमस्थं कर्तृमाद्य
दिसप्तमिति वास्तुशास्त्रेऽपि गृहभान्स्वामिभं गणयेत् भक्तैव नवभिः पुनः यच्छेषं सा भवेत्ताराः सत्रपं
च विभाषमेति यदा तु गृहकर्तुर्गृहस्यैवैकं नक्षत्रं चेत्स्यात्तदा शुभमशुभं वेति निर्णयं स्पष्टमाह अथेति
गृहेशो गृहस्वामीन स्य ऋक्षं नक्षत्रं शोभनं प्रकारेणानीतं वभं गृहभं तयोरेक पादयोरेकमेव चेत्स्यात् तद्गृ
हकर्तृमृत्युप्रदं मरणकारं स्यात् यदाह वसिष्ठः गृहस्वामिनोऽपि त्वेकांघ्रि संस्थं चेन्निधनप्रदमिति नियने
मरणं यद्यो केयं दोषः ननु भिन्नराशि वेतद्दोषस्याविहाय प्रकरणान्त्वात् केचिदन्यदपि प्रयोज।

तमुक्तं यदुक्तं व्यवहारसमुच्चये त्रिभिस्त्रिभिर्मैत्रपञ्चमनिकृत्त्रिकोणे चैकथं द्विद्वादशे त्रिधनातिशोकः म
त्रौ भयं राजभयं च मृत्युः स्युर्विश्वासमध्ये न च भेदाः इति गृहभवनाद्दाशिनानेपि प्रयोजनमाह स
पत्र राशिकूटादिकं सर्वं दम्पत्योर्विचिंतयेत् नैः स्वद्विद्वादशेनूनं त्रिकोणे न धनपात्यता षष्ठाष्टकेन
धनं साहाय्यं यमध्यमं स्मृतं षडष्टकं भद्रशोकागेहे तत्कालं राशितरति ध्यायेद्वादशाहितीयस्त्यादि
के अन्यद्राशिकूटप्रभेदा वर्णेव वश्यमित्यादिकाविवाहप्रकरणे ज्ञाप्ये यः सर्वं पदोपादानात राहस
मरसन्ध्यामङ्गणयोन्यादिके पुनः तेषं न्यातिष शास्त्रात्विद्धमित्यत्रनोदितमिति वास्तुशास्त्रान्ते
प्य यत्र त्रिकादि शुद्धि राशि शुभेषु राशिनिर्णयो वास्तुशास्त्रे अश्विन्यादित्रयं मेषसिंहे शेषं मयाच
येमूलादि त्रितयं चाप शेषेषु नवनायरति शेषेषु भे पु रोहिण्यादि षनवत्र योजने याः यथा रोहिणी
मृगयोर्वृषः आर्द्रापुनर्वसोर्मिथुनं पुष्याश्लेषयोः कर्कः एवं हस्तादौ द्विके च वणादौ द्विके च क
न्याधा मकरधा कुंभराशयः स्मृतास्तथा अयं च पत्तो वास्तुशास्त्रे न दोषा न जे च राशिकूटे नाडीवेधो
न दोषाय उक्तं च चिंतामणौ सर्वमेव कथास्वेव गृहे तत्स्वामिनोरपि परस्परं मित्रयोश्च दकनाडी च
दोषस्य तदिति तिथिप्रयोजनं तिथ्यानयने प्रकारेण एवं च वास्तुशास्त्रे घ्राकाहतेध्वे च फलेत्रिं शाद्भावशे
षके तिथिप्रतिपदो नेया दर्शे रिक्तां च वर्जयेत तत्र न्यायतः शुभाशुभप्रकरणोक्तं उप योगवर्जनं च

मु०
वा०टी०
१८९
186

योगानां प्रयोजनं स्पष्टमेव यन्नाम्ना तं कालं कालं शृङ्गस्थितिरिति ॥ अथ यच्च हस्तादिगणनया वेधफले
क्रियमाणे आयव्ययांशकादि नोपलभ्यते तत्रापि शल्यादिकं निर्दिष्टं संशोध्य वा वेधफलं साध्यं परा
दृभीमपराक्रमः कस्मान्नाद् गुणं वेन दंशल्यादि प्रदायहीनावा वेधफलं गणितेन प्रसादये दिष्टसिद्ध्यर्थे
मिष्टानामायव्ययांशकानां सिद्ध्यर्थे अत्र ह्नात्रिति वेधं प्रदेशफलानयने लीलावतीप्रभृति ज्योतिर्ग्रन्थ
शुद्धिष्टव्या १२ अथ गृहारम्भे वृषभवास्तुचक्रं शालिनीभ्यामाह ॥ गेहाद्यारम्भेऽर्कभाद्वत्सशीर्षे रामैर्दाहो वे
दभैरग्रपादे शून्यं वेदैः पृष्ठपादे स्थिरत्वं रामैः पृष्ठे श्रीर्युगैर्दक्षकुक्षौ १३ लाभो रामैः पुच्छगैः स्वामिनाशो वे
दैर्नैःस्वं वामकुक्षौ मुखस्थैः रामैः पीडा संततं चार्कधिष्ण्याद्दस्रैः शृङ्गैर्दिग्भिरुक्तं समत्वम् १४ ॥ गेहं शृङ्गमा
दिशाहे न प्रासादादि तदारम्भे सति अर्कभान्तद्याक्रान्तनक्षत्रात्रामैस्त्रिभिर्भैर्वत्सस्य वृषस्य शीर्षस्थितैः स
ह्निदाहः फलं स्यात् ततो वेदभैश्चतुर्भिरग्रपादे पुरःस्थितपादद्वये स्थितैः शून्यं जनवासशून्यं स्यात् ततश्च
तुर्भिर्भैः पृष्ठपादद्वये स्थितैः स्थिरत्वं गृहकर्तुः ततो रामभैः पृष्ठस्थितैः श्रीः स्यात् ततो युगैश्चतुर्भिर्दक्ष
कुक्षौ स्थितैर्लाभः ततस्त्रिभिः पुच्छगैः स्वामिनो गृहकर्तुर्नाशः ततो वेदैश्चतुर्भिः वामकुक्षौ स्थितैः नैः
स्वं दारिद्र्यं ततस्त्रिभिर्मुखस्थैः गृहकर्तुः पीडा संततमनवरतं स्यात् उक्तं च ज्योतिषरत्नाकरे प्रकाशे वास्तु
चक्रे प्रवक्ष्यामि यथाव्यासेन भाषितं यद्दृष्ट्वा तेन भान्यत्र आदौ शीर्षेऽभ्यसेत् केचित्तत्र क्रमशोऽग्रपादे स्यान्नव

शी	३	दाहः	
पाद	४	शून्य	
पृष्ठपादे	४	श्रीस्थिरत्वं	
दक्ष	४	लाभः	
पुच्छ	३	नाशः	
वक्ष	४	दारिद्र्य	
मुख	३	पीडा	

नाडिपश्चिमेपृष्ठे च त्रीणि ऋक्षाणि ऊर्द्धे च वा दक्षिणे पुच्छे च त्रीणि ऋक्षाणि ऊर्द्धे च वा
रिवामतः मुखे भत्रयमेवं सुरष्टाविंशतितारकाः शिरस्ताराभिदाहाय पृष्ठे हानौ सोग्रपाद
योः स्थैर्यं स्यात् पश्चिमे पादे पृष्ठे वै वै धनागमः ऊर्द्धे च दक्षिणे लाभः पुच्छे च स्वामिनाशने
वाम ऊर्द्धे च दारिद्र्यं मुखे पीडा निरंतरमिति पितामहानंतवर्णाश्रपितृविद्वदेवदाग्नियुग
ग्निवेदत्रिकेषु भानोः शाणिभे गृहेषु दाहविनाशाः स्थिरतार्थनश्रीः शून्यंवदारिद्र्यमितियोक्र
मेणेति तथैतस्य चक्रस्य प्रकारांतरेण निकृष्टमर्थमाहुरेवेति अर्कर्क्षे यस्मात् सफलं तेनादिभिर्दशभिर स
फलमर्क्षेस्यादिति निकृष्टार्थः उर्क्षं च रविभात्सप्तदशहानि शुभान्येकादशाष्टमात् दशशेषाण्यनिष्टा
नि सामिभिजिहृषवास्त्वनिशेति एवं सविस्तरमार्किस्मृलवामानेशाथात् ।४ वृषमेरवचन्द्रमासेकेनत्रा
चादिदिक्षु द्वाराणि गृहनिर्माणं तत्राणि च सूतिकागृहनिर्माणं एवं शाम्रहूर्तश्च सगपरयाह ॥ ऊर्मे
के फाल्गुने प्रागपरमुखं गृहं श्रावणे सिंहकर्कयोः पौषनक्रे वयाम्योत्तरमुखमसदनं गोजगे कर्के च पौषे
मार्गे जूकालिंगमङ्कर्वर्षे च कुम्भसातिवसलैके शुभ्यस्मूतौ गेहं तदितरा होमविधिभयात्तत्रपातः प्रव
णः १५ ॥ ऊर्मे कुंभे स्थिते सूर्ये फाल्गुने च मासि प्रागपरमुखं गृहं प्राग्गुरुं पश्चिममुखं च गृहं सत् शुभ
फलदं कार्यं स्यात् अत्यर्थः श्रावणे मासि सिंहकर्कसंक्रांत्योः प्रागपरमुखं गृहं स्यात् पौषमासे नक्रेम

मु॰
वा॰टी॰
१८८
187

कर्के संक्रान्तौ वैशाखपरत्वं गृहं स्यात् मृगगोज्ञगे वृषे मेषगे सूर्ये राधे वैशाखे माघे चैत्रे तथा मार्गशीर्षे
मासि जूकालिगे तुलालिवृश्चिकगते सूर्ये सति याम्योत्तरमुखं सदनं दक्षिणमुखं मन्दिरामुखं च सदनं स्यात्
यदाह नारदः गृहसंस्थापनं सूर्ये मेषस्थे शुभदं भवेत् वृषस्थे धनवृद्धिः स्यान्मिथुने मरणं ध्रुवं कर्कटे
शुभदं प्रोक्तं सिंहे भृत्यविवर्धनं कन्या रोगं तुला सौख्यं वृश्चिके धनवर्धनं कार्मुके च महाहानिर्मकरे स्या
द्धनागमः कुंभे च रत्नलाभः स्यान्मीने सद्मभयावहं इति चन्द्रमासानाह श्रीपतिः शोको धान्यं मृति
पशुहृतिं द्रव्यवृद्धिर्विनाशं युद्धं भृत्यक्षतिरथ धनं श्रीश्च वह्नेर्भयं च लक्ष्मीप्राप्तिर्भवति भवनारंभकर्तु
क्रमेण चैत्राद्येष्वमुनिरितिफलं वास्तुशास्त्रादिष्टमिति अन्यच्च आषाढवैशाखपुष्योर्जमाघज्येष्ठेन
याम्ये शुभप्रदे शून्ये निकेतनानां च घटनं नृपाणां योगीश्वराचार्यमतेन शस्तमिति सतेनेति पदच्छेद
श्चैत्रसौराणां च मासानां महान् शुभाशुभफलभेदेन विरोधः अत्र चिकीर्षितगृहद्वारानुकूलरविसं
क्रमसत्त्वे चिरमासेष्वपि वैशाखादिषु गृहारंभः कार्य इति विरोधाभाव इति पितृचरणाः तत्र द्वारनि
यममाह श्रीपतिः कर्किनक्राहरिकुंभगतेर्के पूर्वपश्चिममुखानि गृहाणि तौलिमेषवृषवृश्चिक
याते दक्षिणोत्तरमुखानि च कुर्यात् अन्यथा यदि करोति तदा व्याधिशोकधननाशमश्नुते मीनचा
पमिथुनाङ्गनागते कारयेन्न च गृहं च भास्करे इति नवज्ञे भार्के सहिते श्रावणे मासि नाह श्यामे च गृह

मृत्कांडेनोः एवं मकरार्कसहिते पौषेपि श्रुतेनैव वृहत्तनारदसिंहेन तस्मात् एवं गृहं मेषवृषार्कसहिते नैव शाखेस्स
न् मलाद्यधिकसहिते माघशीर्षमासे तथैव गृहं स्यादित्यर्थः अथात्र सौराणां चान्द्राणां च मासानां निष
धर्म्मणादिति मैयशृहाद्यारंभे नैव भवति यदुक्तं व्यवहारोच्चये निषिद्धेपि ऋक्षे शस्यानकूल शुभे
दिने तृणदारुगृहारंभे मासदोषो न विद्यते इति जगन्मोहनेपि पाषाणस्यादिगृहातिरिक्त निषिद्धमासेन का
र्येत् तृणदारुगृहारंभे मासदोषो न विद्यत इति अत्र केचन नियतदिक्कूटगृहारंभे सर्वदा कालदोषो न
प्रवर्तत इत्याहुः तन्न वचनाभावात् किंच दिक्कूट जलनाशः स्यादित्यनियतदिक्कूटगृहस्य विवार
कोदिसन्निवेशाभावात् अथ गृहनिर्माणनक्षत्राण्याह ध्रुवेति ध्रुवाणि मृदूनि च प्रसिद्धानि वरुणः
शान्तभे स्वाती प्रसिद्धा वसवधनिष्ठा अर्कोहस्तः पुष्यश्च शुभेषु गृहनिर्माणं सत् शुभफलदं यदाह गर्गः
स्वात्रेपि च रोहिण्या पुष्यमैत्रकरद्वये धनिष्ठाहितये पौष्णे गृहारंभः प्रशस्यत इति अत्र वाक्ये मृगात
भिधाने तदुक्तिर्मेहेष्टव वाकालोपवेनेन प्रारंभो भवनस्य वारुणमृदुस्वात्यर्कपुष्यध्रुवैर्वसवर्द्धणंतु
नेरिति अथ सूतिकागृहनिर्माणे विशेषमाह सूतिगृहमिति अदितिपुनर्वसौ सूतीगृहं सूतिकागृ
हनिर्माणं शास्त्रशास्त्रं इति वक्ष्यमाणं स्यात्रनपुंसकत्वेन संबन्धात् तथेति तत्र सूतीगृहे द्वारभित्तिपि भ
यः श्रवणाभिजितोर्नक्षत्रयोः ध्रुवेषाः शास्त्रः उक्तं वशीपतिना पुनर्वसौ च सूतिकागृहस्य निर्मितिः शु

मु॰
वारी
१८८
198

भा विंशतिविलम्भांतरे विंशतिविनाडिका विलम्भे श्रवणः तयोरंतरे मध्ये वर्तिनि नक्षत्रसमुदायेऽस्माङ्कः
तत्र अमत्सद्भाग्ये विंशतिविभाहिरूपे युक्तेवेवं ब्रूयात् तस्मात् हि विंशतिरभिजिन्नक्षत्रे श्रवणांतरे मध्ये विंशतिविलम्
तावयेऽस्त्येव सप्तमी विभक्त्यधिकरणेवोध्येति श्रेतरूपदोक्तिः स्पष्टार्था तदेतन्नक्षत्रलक्षणव्यतिरिक्तवर्णा
त्रयसाधारणं यदाह लल्लः पुनर्वसोरन्त्यपादेनारूकतेध्ये सूतिकागृहे श्रवणाभिजितोर्मध्ये प्रवेशान्तरेका
रयेत इति आवश्यकेतेन श्रवणाभिजितोर्मुहूर्तेस्तेउद्द्वयोर्वायासद्तात्पर्यः ब्राह्मणस्य तु आगुक्तनक्षत्रे
ष्वेव सूतिकागृहनिर्माणप्रवेशौ नत्वं सूतिकागृहे नैऋत्याकार्यं यदाह वृद्धवसिष्ठः पैद्रे तु विक्रमस्थानमा
ग्नेय्यां पचनालयः वारुण्यां भोजनगृहं नैऋत्यां सूतिकागृहं याम्यायां शयनस्थानं वायव्यां पशुमन्दिरं
कौवेर्यां निधनस्थानमैशान्यां देवतालयमिति स्मृतिभास्करे गर्गः वारेनक्षत्रे लग्ने शोभनदिने दोषविवर्जि
ते स्थाने कुलादिविशेषोक्ते सूतिकाभवनं कुर्यादिति कालनियमउक्तः रत्नकोशे आसन्नप्रसवमासि कुर्या
च्चैव विशेषतः तदहस्तत्प्रसवकाले स्यादिति शास्त्रे शुनिश्चय इति वराहेणापि तेन तन्त्राद्यभिधानकृतम
यथा हस्तादित्यशशांकतिष्यपवनेष्वाणेषामित्रानिलाचित्राश्विश्रवणेषु हेऽश्विकचतुर्दोहितास्यविविक्तेति
षोडशकार्या वार्यं शनैश्चरस्तु शापिनां वारेनक्षत्रे लेवि शेषसद्भिर्वैश्मनि सूतिकागृहविधिः क्षेमंकरः कीर्ति
तः इति वेश्मनिर्वचनार्थं स्थानेस्मद्भिः शुभागृहे सूतिकागृहप्रवेशकालविशेषमाह ज्योतिर्वसिष्ठः ॥

अथातः संप्रवक्ष्यामि सूतिकागारवेशनं मासे त्वनवमे प्राप्ते पूर्वपक्षे शुभे दिने प्रसूतिसंभवे काले सद्यएव
प्रवेशयेदिति पूर्वपक्षे शुक्लपक्षेन नक्षत्रादीन्याह गर्गः रोहिण्यैन्द्रं वयोः सैषु स्वातीवरुणयोरपि पुष्ये श्रुतेनवं
सौहस्त्येथ निष्ठान्सुतरामश्च मैत्रत्वाष्ट्रे तथाश्विन्यां सूतिकागारवेशनं गृहे नक्रूले वा यौनतरिकाश्च षष्ठा एव वर्जि
ते सर्वे वाथ शुभाः केन्द्रे पापाश्च त्रिषडायगाः शुभो भौ शुभसन्दृष्टौ सूतिकावेशनं शुभमिति ८५ अथ प्रागभि
हितानां सौराणां चान्द्राणां वा मासानां प्रकारान्तरेणैकवाक्यतां शार्दूलविक्रीडितच्छन्दसाह ॥ केचिन्मेष
रवौ मधौ वृषभगे ज्येष्ठे शुचौ कर्कटे भाद्रे सिंहगते यवे शुभ्रजि चोर्जे लो मृगे पौषके माघे तक्रघटे शुभेति
गदितं गेहं तथार्जनं सकन्या यावत्तथा यत्नघ्यपि च सत्कृत्यादिमासाद्भवेत् ॥ एवं दिग्द्वारविशेषेणैकवा।
क्यतोक्ता इदानीमेतादृश्यपद्यं पते मेषसंस्थे रवौ मधौ चैत्रेमासि गेहं प्रारब्धं शुभं स्यात् तथा वृषस्थे सूर्ये ज्येष्ठ
मासि तथा कर्कटस्थे सूर्ये शुचौ आषाढे मासि सिंहगते सूर्ये भाद्रपदे घटेन तुलास्थितेन रवौ अश्वयुजि आश्वि
नमासि अलोहाब्लिकस्थ सूर्ये ऊर्जे कार्तिके मासि मृगे मकरस्थे सूर्ये पौषमासि तक्रघटे मकरं भस्ये माघे प्राव
धं गृहं शुभं स्यादित्यर्थः इति केचिन्निगदितं अस्यायमाशयः मेन चापे त्यादिना हि स्वभावराशय एव निषि
द्धाः शाकोथान्यमितादिवा वक्रियंतश्चान्द्रा अपि मासा निषिद्धाः अत्रान्ये सौरा चान्द्रा वा विहितास्तेषामयमेक
वाक्यताप्रकारः मेषस्थे रवौ चैत्रेपि गृहं शुभे यत्नवै चैत्रो निषिद्धः समीनार्कविषयः सिंहगते सूर्ये भाद्रपदे

शु. वा टी ८५ 189

पिशुभं श्रावणश्चैत्रस्यात्स विहितं न्वादेव शुभः यत्तु भाद्रपदे निषेधः स कन्यार्कविषयः तुलागते सूर्ये चा
श्विने पिशुभं यत्तु स्य निषेधः स कन्यार्कविषयः वृश्चिकस्थे सूर्ये कार्त्तिके पिशुभं निषेधविषयेऽस्य तस्यैव वक्ष्य
ति मार्गशीर्षे विहितं तच्च मकरस्थे सूर्ये पौषे पिशुभं यत्तु नवं कं सपद्दिते सौम्यः शुभः मकरकुंभस्थे सूर्ये माघे
पिशुभं निषेधस्तु धनुरर्कविषयः अत एव सौम्यफाल्गुणौ वैशाखे माघ्य श्रावणकार्त्तिकाः मासाः स्युर्गृहनि
र्माणे शुभाः रोगप्रदश्चेदा इति नारदवाक्ये मासेन पस्येन पमिमाघ्येव नभसि तिषे ऊर्जे च गृहनिर्माणं शुभं त्रयो
त्रयन प्रदं इति वसिष्ठवाक्ये चाश्विनकार्त्तिकमासानां शुभत्वप्रतिपादकं तुलावृश्चिकमकरकुंभार्कसाहित्य
शशास्त्रपरं वचनान्तरं वाऽपि तेन निषेधः शास्त्रान्तविषयः एवमेव फाल्गुणस्य शुभत्वं कुंभार्कविषयं मीनार्क
साहित्ये तु निषिद्धः सः ननु कार्त्तिकमाघमासौ श्रीपतिना निषिद्धौ यः कोऽविषय इत्यत आह अथेति ऊ
र्जे कार्त्तिकमासः कन्यायां कन्यागते रवौ न सन् शुभश्च पुनस्तपो माघमासे धनुरर्के न सन् अपि श्री
पतिना नन्वेतदयुक्तं प्रतिभाति यतश्चान्द्रमासेनैव ज्यादि [illegible] संतीत्तत्र कार्त्तिकमासे कन्यासंक्रा
न्तिः मासे मासे धनुरर्कस्य कदापि न संभवेत् यतः कार्त्तिकस्य माघस्य वा शुक्लप्रतिपदादिदर्शान्तिथी याव
त्तावत्संज्ञेत्यत आह कृष्णादिमासादिति अस्ति हि द्विविधो मासः शुक्लादिः कृष्णादिश्चेति तत्र शुक्लपक्ष
प्रतिपदमारभ्यामावस्याः पर्यंतं शुक्लादिः कृष्णपक्षप्रतिपदमारभ्य पूर्णिमान्तः कृष्णादि यथा चैत्र शुक्लप

देमनहृदयेपिमप्यवैवंपूर्णिमास्यन्तेतरेकृष्णपक्षश्चैत्रमासएव एवंचान्द्रमासोभवति सएवंकृष्णपक्षे
यदिवैशाखपक्षत्वेनव्यवह्रियतेतदनन्तरभावीशुक्लपक्षोवैशाखशुक्लः सर्ववादिसिद्धस्तदाकृष्णा
दिमासःसंभवति उभयथाहिमासेव्यवहारः अथशुक्लपक्षेतच्चाद्दृश्यतेदिनेदिनेइति अष्टमी
कृष्णपक्षस्यरोहिणीऋक्षसंयुता भवेत्प्रोष्ठपदेमासिजयन्तीनामसास्मृतेतिच अत्रयदिदर्शान्तोमासो
विवक्षितः तदाभाद्रपदकृष्णपक्षेश्रावणोमासेवेत्येवंब्रूयात् तदेतन्मासस्यकृष्णादित्वपक्षेमासेष्वनऊ
र्धर्मणीशुक्लान्तकालादिसंख्यया मासोक्तताशुनामासेमेषु शुक्लादिभिर्गतैर्दिनादीनिवक्तव्यानि
शुक्लादित्वपक्षमाणे तत्राश्विनपूर्णिमान्तःकार्तिकपूर्णिमान्तकृष्णादित्वेनकार्तिकव्यवहारात्कन्यासं
क्रान्तिसंभवात्निषेधउपपन्नोभवति एवमेवमाघेमासियन्नरकेसंभवेत्तन्निषेधसार्थको इत्यलमियता ९
अथतिथिपरत्वेनद्वारनिषेधमुपजातिकयाह ॥ पूर्णेन्दुतःश्रावणदनेनवम्यादिष्वन्तरस्यान्त्यपश्चिमा
स्या दर्शादितःशुक्लदलेनवम्यादेर्दक्षिणस्यानशुभंवदेति १७ ॥ पूर्णेन्दुतःपूर्णिमातःकृष्णाष्टमीप
र्यन्तेक्रियमाणेगृहेश्रावणदनेनशुभंवदेति कृष्णनवमीतश्चतुर्दशीपर्यन्तेक्रियमाणेगृहेउत्तरस्यानशु
भं अथदर्शादितःशुक्लाष्टमीपर्यन्तेपश्चिमास्योगृहेनशुभं शुक्लनवमीतश्चतुर्दशीपर्यन्तेदक्षिणास्या
गृहेनशुभंवदेतिताश्चतिथिषुतत्तद्दिगभिमुखंगृहंनकर्तव्यमितिवाक्यार्थः फलितःपउक्तेव्यवहारो

मु॰
वा टी॰
१५०
190

मृषे प्रतिमानोष्टमीयावत्पूर्वस्यां वर्जयेद्गृहे उत्तरस्यां न कुर्वीत नवम्यादिचतुर्दशीम् अमावस्याष्टमीया
वत्पश्चिमस्यां विवर्जयेत् नवम्यादौ दक्षिणस्यां यावत्कृष्णचतुर्दशी विहितैस्तिथिभिर्याप्यैत द्वैवोक्ताः हिती
यापञ्चमी सप्तम्यो तृतीया षष्ठी तथा त्रयोदशी पंचदशी तिथयः सुःशुभावहाः दारिद्र्यं प्रतिपत्स्वेव चतु
र्थीषु तथाष्टिली अष्टम्युच्चाटनं चैव नवमीषु शस्त्रघातिनी दर्शे राजभयं नंदे यष्टे ते दारविनाशनमिति पद्म
फलवत्तत्रैव शुक्लपक्षे भवेत्सौख्यं कृष्णे तस्करतो भयमिति अत्र संग्राह्या रवेश्च फलानि लिख्यन्ते तत्र
वराहः मार्गतरुकोणकूपस्तंभभ्रमविद्धमशुभं द्वारं उच्छ्रायाद्विगुणितां भूमिं त्यक्त्वा न दोषाय भ्रमो
जलनिर्गमप्रदेशः प्रणालिकेत्यर्थः विद्धमशुभं वास्थितं ततो च्छ्रायो द्वारस्य दृश्यते तथा च गर्गः ।
द्वारोच्छ्रायाद्विगुणितां भूमिं त्यक्त्वा बहिः स्थिता न दोषाय भवेत्येत इति वथ्या विद्धद्वारं नाशाय ऊमाव
दोषदं तरुणापकद्वारेषां कोव्ययो बुति स्ताविणि प्रोक्तः कूपेनापस्मारो भवति विनाशश्च देवताविद्धे
स्तंभेन स्त्रीदोषः कुलनाशो ब्रह्मणाभिमुखे इति एक विद्धद्वारं एक द्वारे च स्यद्वारांतः निवेत रं एकस्मि
न्ह्रतिदेवताः सप्रतिमाः नाशः स्वामिनयत्र ब्रह्म वेदाय काशीति पद चक्रस्थितं ब्रह्मस्थानं वेयोक्तं ते
यदाह विश्वकर्मा गृहमध्ये कृतं द्वारं द्रव्यधान्यविनाशनं इति विशेषमाह भारद्वाजः शिरामर्माणि वंशा
श्चनालमध्यं च सर्वेषाः विद्धाय वास्तुमध्ये च द्वाराणि विनिवेशयेत् इति वास्तुमध्ये च ब्रह्मस्थाने तत्रि

पतनश्चद्भमितिवसिष्ठोक्तेश्च अस्यापवादमाह विश्वकर्मा देवागारे विहारे वप्रपायां मेरुपेष्वपि श्मेनोल्यां च
मुखेचैवमथेहारे निवेशयेत् इति देवालयादिस्थाने शुक्रास्तस्य गृहारंभे नगनहारस्य व्यवस्थाऽस्त्यानवेदइतिनि।
ष्कृष्टोऽर्थः अथैकाशीतिपदवक्रोक्तेः सामान्यविशेषभावपुरःसरं ग्रन्थसन्दर्भेणवराहसंहितायामुक्तं अथिनो
क्तं पतनस्मिंश्चक्रे मरुद्गतेर्विचारो अप्रसंगात् केचित्तुयोजनभावोनोक्तमितिप्राहुः तन्न हिवास्तुनरस्य शिरसमर्म
वृशादिद्वष्टस्थानानामशुभफलदानां तागोक्तासंप्रयोजनत्वात् तथा तस्यैवशुभफलदानामन्यगोवाहू
दिस्थानानां ग्रासप्रत्यक्तोयः वसिष्ठाद्युषिसंहितासु तवास्तुशास्त्रार्थमेवतस्याविधनमित्यनोत्रानुक्तिः ८ ॥
भौमार्कतिक्तामासूनेचरोनेनेविपंचके मंत्राष्टमैः शुभैः गृहारंभाश्चायागिंः स्मृतः भौमार्कवारो रि
क्तावप्रसिद्धाः अमावास्यादिक्षयाप्रतिपत् उपलक्षणत्वात् अष्टम्यापिप्रतेतूनेकालेतथापंचके थनिष्ठो
त्तरार्धादिकाश्वेवनक्षत्रपंचकमित्युच्यते पंचकशब्दान्मेयाद्येसंख्याग्रहः संताः सेचः सूत्राध्ययनेष्वतिकर्मन
यः विगतंपंचकेयस्मिन्नेवविधेचकालेसतिचरोनेचरराशिभिः मेषकर्कटतुलामकरचैरेचतुःनेश्चरे
लग्नेस्थितेहि स्वभावेन गृहारंभः कार्यः यदुक्तंव्यवहारोच्चये द्वितीयापंचमीपूर्णतृतीयाचाष्टिका
तथा सप्तमीदशमीचैवद्वादशैकादशीतथा त्रयोदशीपंचदशतिथयः स्युः शुभावहाः इति श्रुत्वा
स्तिथयोत्रान्नैविषिद्धाः तदप्युक्तं नवैवदातिष्ठं प्रतिपत् आयाश्चतथाचतद्वारिणी अष्टम्यां रवौचैव

मु.
वाटी.
१५८
191

नवमी शत्रुघातिनी दर्शे राजभयं जन्मर्क्षे स्मृते दारविनाशनं इति वास्तुशास्त्रेऽपि वर्ज्यलग्ने चरे वापि वा रिक्ता मा
र्गकवासरे व्यंगाश्चान्यावि गे चंद्रे रन्ध्रपापेत्तयः शुभो विति नन्वत्र यनिष्ठापंचकनिषेधो नुपपन्नः नन्वत्र
प्रकरणोक्ता यनिष्ठादिपंचकनिषेधेन गतार्थत्वात् न पुनरुक्तमिति वयं तयोर्गृहगोपनमिति पूर्वमुक्तेन
त्र गृहस्य तृणकाष्ठादिभिराच्छादने गोपनं तद्धि सिद्धस्य गृहस्य संभवेत् गृहारंभस्तु शारंभवनरूपः स
न सिद्धस्येवेति ननु पूर्वमुक्तवक्तव्यत्वातिव स्वकेष्वपि विति गृहारंभनक्षत्रेषु यनिष्ठाशततारकोत्तराभ
द्रपदरेवतीनां विहितत्वेन यकस्यापवदपूर्वभाद्रपदायाः निषेधोक्तिः कर्तव्यतायां सत्यां पुनः पंचकनिषे
धानुपपत्तिः सत्यं केचोच्छ्रयापादिविषयको यं निषेधः यदाहुर्माण्डव्याः यनिष्ठापंचके नैव कुर्यात्स्तंभसमु
च्छ्रयं सूत्रधारशिलान्यासप्रकारादि समालभेदिति प्रकारो देवालये चान्ये पुनरेवमाहुः विवाहप्रकर
णोक्तानि पंचकानि रोगाग्निराजचौरमृत्युसंज्ञानि तैः रहितैर्लग्नवाणपंचकरहिते लग्ने इत्यर्थः उक्तं
वशिष्ठेन शादेवज्ञैः विषमस्थे केन्द्रे खलग्रहे वर्जिते पंचके विति नाचार्यवाक्ये प्रमाणमस्ति ग्रहाष्टमद्वादशा
स्थानव्यतिरिक्तस्थानस्थैः शुभैः खलैः पापैस्तृतीयैकादशषष्ठस्थानस्थैः स्वापलक्ष्येन लग्ने सति गृहारंभः
कार्यः उक्तं च श्रीपतिना पापैस्त्रिषष्ठायगतैस्त्रिकोणकेन्द्राश्रितैः साधुभिरालयस्य वदंति निर्माणमि
हाष्टमस्थः क्रूरस्तु कर्तुर्मरणं करोति इति अन्यदप्युक्तं तत्रैव द्व्यंगे गस्थिरे वा भवनं विलग्ने सौम्यग्रहे शुक्र

निरीक्षितेच कर्मस्थिते वीर्ये श्रुते स्वसौम्ये निर्माणमाङ्गभवनस्य संतः शुद्धकेन्द्रनिधनस्थितेऽष्टमे सौम्यव
र्गमनजाङ्गमेपिच सन्निवेशनादितो हिवास्तवः स्फुरितिभिन्नवगादेयन्द्विविदिति १८ अथ देवालये गृहारं
भे जलाशये च विदिग्गवस्थिते राहुमुखे सफलमिदं वशाङ्कनन्दसाह ॥ देवालये गेहविधौ जलाशये राहुमु
खे शम्भुदिशि विलोमतः मीनार्कसिंहार्कमृगार्कतस्त्रिभे खातं मुखात्पृष्ठविदिक् शुभा भवेत् १९ ॥ अ
त्रयथासंख्येसेवन्यः देवालयप्रारम्भे राहुमुखे मीनार्कतस्त्रिराशय वस्थिते सूर्ये ईशानीतो विलोमतो विपरी
तविदिक्षु वायव्यादिषु राहोर्मुखे स्यात् अथ मीनमेषवृषराशय अवस्थिते सूर्ये ऐशान्यां राहुमुखे मिथुनक
र्कटसिंहराशयवस्थिते सूर्ये वायव्यां राहुमुखे कन्यातुलावृश्चिकराशिवस्थिते सूर्ये नैरृत्यां राहुमुखे य
वे धनुर्धरमृगाङ्गभराशिष्ववस्थिते सूर्ये आग्नेय्यां राहुमुखमित्यर्थः एवं गृहारम्भे सिंहार्कतस्त्रिराशय

	ऐशान्यां	वायव्यां	नैरृत्यां	आग्नेय्यां
देवालये	मी १२ मे १ वृ २	मि ३ क ४ सिं ५	क ६ तु ७ वृ ८	ध ९ म १० कुं ११
गृहारम्भे	सिं ५ क ६ तु ७	वृ ८ ध ९ म १०	कुं ११ मी १२ मे १	वृ २ मि ३ क ४
जलाशये	म १० कुं ११ मी १२	मे १ वृ २ मि ३	क ४ सिं ५ क ६	तु ७ वृ ८ ध ९

॥ [illegible] ॥

वस्थिते सूर्ये विलोमतः ऐशान्यादिविदिक्षु राहुमुखे स्या
त् अथ जलाशयप्रारम्भे मकरार्कतः त्रित्रिराशय वस्थिते सू
र्ये विलोमत ऐशान्यादिविदिक्षु राहुमुखे स्यात् अथ एवम
पि स्पष्टार्थं न्यासो यथा अस्य फलमाह खातेति देवाल
यादिविषये खाते भूमिशोधने कर्तव्ये सति राहुमुखे।

कोणदिशः सकाशात् स्पष्टवर्तिनी विदिक् शुभा भवेत्। यथा देवालयविषये मीनादित्रिराश्यवस्थितत्वेन
येशान्यां द्वारमुखत्वं तत्स्पष्टविदिक्। आग्नेय्यां यस्याग्रथमेवोत्तरारंभः शुभफलदः। एवं मिथुनादित्रिराश्य
वस्थिते सति नैरृत्यां द्वारमुखत्वं वा यद्यपि तत्स्पष्टविदिक्। पश्चान्नीतस्यास्तोतारंभः शुभः। एवं सर्वत्र शेषेषु गृहविधौ
जलाशयविधौ वापि द्वारमुखत्वं कस्यां विदिशि स्यात्तत्स्पष्टदिशि वास्तुं शुभफलदं कार्यमित्यर्थः।
यतः सर्वेषां विदिक्त्रये व्याप्ते यत्र मुखावस्थितिः सा प्रथमा यत्रोदरावस्थितिः सा द्वितीया यत्र पृष्ठावस्थितिः
सा तृतीया यथा ऐशान्यां मुखत्वं वायव्यामुदरं नैरृत्यां पृष्ठं अत आग्नेय्यां मुखोत्स्पष्टविदिक्। एवम
न्यत्राप्याहुः। यदाह विश्वकर्मा ईशानतः सर्पति लोकसर्पो विहाय सृष्ट्यिं गणयेद्विदिक्षु शेषो भवा वास्तोस्तु ख
मास्यपृष्ठं त्रयं परित्याज्य खनेच्चतुर्थमिति। ज्योतिश्चिन्तामणौ वृषार्कादि त्रिके वेद्यां सिंहादिगणये हृदे
देवालये च मीनादिनगे मकरादिभिरिति वसिष्ठः गृहारंभे वास्तुनरमाह त्रिषु त्रिषु च मासेषु नं।
भस्यादिषु चक्रमात्। यद्दिङ्मुखो वास्तुनरस्तन्मुखं सदनं शुभम्। अन्यदिङ्मुखगेहे तु दुःखशोकभय
प्रदे। चतुर्दिग्गादिशालानामेषदोषो न विद्यत इति। नभस्यादि षट्कं सिंहाद्यर्कसंक्रमोपलक्षणे नाग
वास्तुविदिशि खननार्थः। नरवास्तुस्तु गृहस्य भर्तृदिङ्मुखो ज्ञेयः। तत्र खातारंभादिनक्षत्राण्याह मा
ण्डव्यः। ध्रुवमृदुभे विदधीत खातं शिलास्तम्भे वार्धमृदुत्वेऽप्यपदे तिर्यङ्मुखैर्द्वारकपाटयाने गृहप्रवे

योऽप्यडभिर्थुवेदैरितिवातेभूमिशोधनेपद्धे ॥१९॥ अथगृहेकूपनिर्माणादिगवस्थितफलंशालिनीछन्द
साह ॥ कूपेवास्तोर्मध्यदेशेऽर्थनाशस्त्वैशान्यादौपुष्टिरैश्वर्यवृद्धिः सूनोर्नाशःस्त्रीविनाशोमृतिश्चसं
पत्पीडाशत्रुतःस्याच्चसौख्यं वास्तोरैशान्यामितिवास्तुशास्त्रे पुंलिङ्गेऽपिवास्तोर्गृहस्यमध्यदेशेकूपेजल
कूपेकृतेसतिस्वामिनोऽर्थनाशःस्यात् अथैशान्यादिदिक्षुप्रदक्षिणमार्गेणाष्टासुदिक्षुपुष्टिविभ्रमादिफलंय
था ऐशान्यांकूपेपुष्टिः पूर्वस्यांकूपेऐश्वर्यवृद्धिः आग्नेय्यांकूपेपुत्रनाशः दक्षिणस्यांकूपेस्त्रीविनाशः नै
र्ऋत्यांकूपेगृहकर्तुर्मृतिः पश्चिमायांकूपेसंपत्स्यात् वायव्यांकूपेशत्रुतःसकाशात्पीडास्यात् उत्त
रस्यांकूपेसुखंगृहस्वामिनएवन्यासः उक्तंचवसिष्ठेन मध्येऽर्थनाशः ऐश्वर्यंपुत्रनाशश्चस्त्रीनाशोनि
धनेभवेत् संपत्सुखभयंसौख्यंपुष्टिःप्रागादितःक्रमात् कूपेकृतेमध्यमेनधनहानिश्चवास्तुनः त
स्मात्सम्यग्विचार्यैवकूपंकुर्याद्गृहिमानिति ॥२०॥ अथगृहमध्येकरिष्यमाणानामुपकरणगृहा
णांदिक्क्रमेणवसंततिलकछन्दसाह ॥ स्नानस्यपाकशयनास्त्रभुजेश्चधान्यभाण्डारदैवत
गृहाणिचपूर्वतःस्युः तन्मध्यतस्तुमथनाज्यपुरीषविद्याभ्यासाख्यरोदनरतौषधसर्वधाम ॥ पूर्वतःपू
र्वादिदिक्षुस्नानगृहादीनिगृहाणिस्युः यथापूर्वस्यांस्नानगृहं आग्नेय्यांपाकगृहं दक्षिणस्यांशय
नगृहंनैर्ऋत्यांशस्त्रगृहं पश्चिमायांभोजनगृहं वायव्यांधान्यसंग्रहगृहंउत्तरस्यांभाण्डारस्यद्रव्यसंग्र

म॰
वाटी
१५३
193

हं ऐशान्यां देवतागृहं स्यादित्यर्थः यदाह वसिष्ठः ऐन्द्र्यां दिशि स्नानगृहं आग्नेय्यां पचनालयः याम्या-
यां शायनं देवमैनैरृत्यां शास्त्रमन्दिरं वारुण्यां भोजनगृहं वायव्यां धान्यमन्दिरं उदीच्यां हाटकं सद्म ऐ-
शान्यां देवमन्दिरं इति हाटकस्य सुवर्णस्येदं हाटकं कं रूप्यपेपिशाच्यां दिशि स्नानगृहं माग्नेय्यां पचना-
लयं शायनं याम्यदिग्भागे नैरृत्यां शास्त्रमन्दिरं प्रतीच्यां भोजनगृहं वायव्यां धान्यमन्दिरं भांडारसदने
सौम्येथ ऐशान्यां देवतालयमिति नारदस्तु विशेषमाह भांडागारं तन्नैरृत्यां वायव्यां पशुमन्दिरमिति ।
विश्वकर्मा पुनरुत्तरस्यां जलस्थानं पूर्वस्यां स्नानगृहं तथेत्याह तन्मध्यान्तरे इति पूर्वाद्यष्टदिक्षु तन्मध्यान्त-
रालयोर्दिग्विदिशोर्मध्ये षोडशसंख्यके मथनाद्यष्टगृहाणि स्युः यथा पूर्वाग्नेय्योर्मध्ये मथनसदध्यायालोडन-
स्य गृहं स्यात् आग्नेयीदक्षिणयोर्मध्ये आज्यस्य घृतसंग्रहस्य गृहं दक्षिणनैरृत्योर्मध्ये पुरीषस्य विष्ठा-
त्यागस्य गृहं नैरृतीपश्चिमयोर्मध्ये विद्याभ्यासस्य गृहं पश्चिमवायव्ययोर्मध्ये रोदनं वायव्योत्तरयोर्मध्ये
रतस्य कामोपभोगगृहं उत्तरैशानयोर्मध्ये औषधस्थाने चिकित्सागृहं ऐशानीपूर्वयोर्मध्ये उक्तव्यतिरि-
क्तसर्ववस्तूनां धामगृहं कार्यं स्यादित्यर्थः यदाह वसिष्ठः इन्द्राग्न्योर्मध्ये मथनं मध्ये याम्याग्न्योराज्येन मन्दिरम
यमराक्षसयोर्मध्ये पुरीषत्यागमन्दिरं राक्षसांबुपयोर्मध्ये विद्याभ्यासगृहं तथा वाय्वारुण्योर्मध्ये
रोदनेमन्दिरं स्मृतं। कामोपभोगसदनं वायुकौवेरमध्यमे कौवेरैशानयोर्मध्ये चिकित्सामन्दिरं सदा ॥

शब्दे वेशयोर्मध्ये सर्वे वस्तुसंग्रहं सदनं कारयेदेवं क्रमादुक्तानि धिष्ण्यानीति कश्यपः ईशाग्नेयोर्म।
ध्यने गेहं पाम्याग्न्योर्हेनमन्दिरं पश्चिमत्यागसदनं मध्ये राक्षसकालयोः विद्याग्रहं जलाधीशनैरृत्यो
र्मध्यमेततः रोदनसदनं नजलाधीशसमीरयोः कामोपभोगसदनं मध्ये वायुकुबेरयोः। नवर
त्नालयं मध्ये कुबेरेश्वरयोस्ततः इदं धान्यार्थोन्यगृहमिति २१ अथ गृहारंभप्रसङ्गानुषक्तं सामान्य
तः धाम्नि ग्रहबलमपृष्ठमिथाथ यदानीमारब्धस्य गृहस्य लग्नग्रहाणां नियतस्थानावस्थितानि यतायुर्दा
य योगद्वयमुपजातिकयाह ॥ जीवार्कविक्रुकधानेश्वरे कूलग्नादिजामित्रसुखत्रिगेषु स्थितिः
शतेस्यात्स्वदांसितार्कोरजेपतनन्योगमतेशतेहे २२॥ अत्र योगद्वयो गृहस्थानयोर्यथासंख्यं संबंध
यथा जीवे लग्नेस्थान शुक्रारौ षष्ठे विशे बुधे जामित्रे सप्तमे शुक्रे च तर्थ धाने स्थरस्तृतीये यवनिय
तस्थानावस्थितग्रहसहिते लग्नेऽारब्धस्य गृहस्य स्थितिरब्दशतं वर्षशतं स्यात् अयमेको योगः यदाह
श्रीपतिः उदये गुरुरस्तगृहे धाणिजः सहजे बुधानिसुरविस्तरिपौ जलगश्चसितो भवनस्य तदा
शरदां शतमायुरुदाहृतवान्॥ इति अथ द्वितीययोगः सितेतिश्रुक्रोलग्ने अर्कस्तृतीये आरः षष्ठे इ
ज्यः पंचमे एवंविधे लग्ने आरब्धगृहस्थितिर्द्वे शते वर्षाणि तद्वयं स्यात् यदाह श्रीपतिः लग्ने भृगुः
पुत्रगतश्च जीवः षष्ठेऽजस्तिमकरस्तृतीये निवेशनेयस्य गृहस्य तद्धि शतद्वयंतिष्ठति वत्सरा

म॰
वाली॰
१२८
194

णोऽइति २२ अथान्यनियतायुर्दायथयोगमिंद्वेशाक्कन्दसाह ॥ लग्नाब्दपेशुभयुतभानुभिः कें
द्रगैर्दीर्वृषशतायुरालयः बन्धोगुरुर्व्योम्निशशीजगजौ केजौ लाभेतदाशीतिसमायुरालयः २३॥
अत्रापियोगद्वयेस्थानग्रहयोर्यथासंख्येनसंबन्धः लग्नेगुरुः दशमेवुधः एकादशेसूर्यः लग्नव्यति
रिक्तेकेंद्रेगुरुःस्यात्तदेवंविधेयोगेजातस्यालयोगृहेवर्षशतमायुर्भवस्थानेयस्यताहशःस्यात् य
दाहश्रीपतिः यदिविलग्नगतोभृगुर्गतोम्बुवेशपिमतःखलुकेंद्रगतोगुरुः दिनकृदायगतश्चतदा
वुधैः शतमितायुरुदीरितमालयइति अयंप्रथमोयोगः अथद्वितीयः बन्धाविति चतुर्थेगुरुःद
शमेचन्द्रमंगलयोनेश्वरावेकादशेस्यातांतदाआलयः अशीतिसमायुः अशीतिनवर्षाणिआयुर्यस्य
ताहशःस्यात् यदाहश्रीपतिः शशांकजीवौखरसातलस्थौ उज्जार्कजौलाभगतौवयस्य प्रारंभकाले
भवनस्यतस्यस्थितिर्निरुक्ताशरदामशीतिः आलयशब्दःपुंलिंगः शृह्लाघुवाँसोसाभूम्यतनिकायनिल
यालयाइत्यमरः पुंसिचेतिसंबध्यते नृपभेदेनवाऽलिंगः अतएवनैषधीयप्रयुक्तः निशिमाणिक्यम
यायदालयाइतिपंक्तिविंशतीत्यादिनाशीतिशतशब्दौसंख्यावाचिनौनिपातितौ २३॥ अथलग्नो
पगृहयोगत्रयमनुष्टुभाह ॥ स्वोच्चस्थकेलग्नगेवागुरौवेषमगतेथवा शनौस्वोच्चेलाभगेवाल
ग्नाधिपतेकविरेहसे स्वोच्चस्थेमीनेस्थशुक्रेलग्नगतेगृहेक्विरेलग्नाधिपतेस्यात् अथवास्वोच्चस्थेक

केंद्रेस्थे गुरौ वनर्षे स्याने गते सतिता हर्षामेव गृहे अथवा स्वोच्चे पेन लाभस्थे पानौ पकाद पास्थान गते पि लभी
गुणे गृहे स्यात् यतस्त्रैकं योगत्रयं यदा हर्षापतिः स्वोच्चवर्तिनि भृगौ विलग्ने देवमंत्रिणि रसातलस्थि
ते स्वोच्चगे रविसुते घनाय गे स्यात् क्षितिस्तु सवितं सदक्षियेति २४ अथ गृहस्यापारगामियोगमनष्टु
भाह ॥ घानो बेरय दे कोपि परां पाद्येआग्रेरो गृहे अद्योतः पहृत्तस्य जयांश्च हस्तपो बलः २५॥ यकोपि ग्र
होस्तुत्कृष्टशुभफलदाता पापो पास्यः पाकनवोपास्यः सेन यदि घेन सप्तमे स्यात् अथवा बेरदशमे स्यात्तदा स गृ
हस्तनृदं शारव्य मध्यांतवर्षमध्ये पवपारहस्तस्य अन्यहस्तगामि जयान वेहर्णि पोवाम्नाणादिवर्णस्वामी।
विशार्थीशौ भार्गवे जैपाहस्या यभिहितः सचेद्बलः स्यात् उक्तं च वसिष्ठेन यकोग्रहोत्र परभागवतीजपयागतः
कर्मगतोयवा स्यात् करोति गेहं परहस्तयातं करोति वर्णाद्विबलः सचेद् इति खेटो वर्णस्वामी उक्तं च
श्रीपतिना यकोपि नेपरभागवती वियत्स्मरस्थः खचरोक्रमध्ये करोति गेहं परहस्तयातं स्याद्वल
स्त्रैदिह्वर्णनाथः इति यदा नवर्णाधीशः सबलः स्यात्तदा परहस्तगामि न स्यादित्यर्थः सिद्धं २५ अथ गृ
हारंभे नक्षत्रविशेषेणाच फलविशेषान्विवक्षुरादावकुंभस्तवक फलविशेषयोगद्वयं वसंततिलकयाह
॥ पुष्यध्रुवेन्दुहरिसर्पजलैः सजीवैस्तद्वासरेण च कृतं च गृहं सुराज्यदं स्यात् दीशाश्विनत्वसपाशिशिवैः
सशुक्रैर्वारेसितस्य च गृहं धनधान्यदं स्यात् पुष्याध्रुवाणि च सिद्धानि रेडमृगाः हरीः श्रवणः सपोस्त्र

मु.
वा टी.
१५५

195

षाजलं पूर्वाषाढा यैतैर्नक्षत्रैः सजीवैः गुरुयुक्तैः गुर्वधिष्ठितैः नक्षामसेण बृहस्पतिवासरेण कृतेन क
र्माकथं गृहं सततं पुत्रराज्यं ददाति हर्षणं स्यात् यदाह वसिष्ठः इज्योत्तरात्रयादीन्दुविस्रथान्तज
लोडुषु गुरुणा सहितेष्वेषु कृते गेहं श्रियापुत्रमिति वारग्रहणफले विशेषश्च नारदवाक्ये श्रव
णाषाढयोश्चैव रोहिण्यां चोत्तरात्रये गुरुवारे कृते वेश्म राज्ययोग्यमिवोच्यते तद्गेहे जातपुत्रस्य
राज्यं भवति निश्चयात् इति मतत्रभेदो वचनप्रामाण्यात् हीशेति हीशविशाखास्वाश्विश्वाश्वि
नी तद्भाविचावसुथनिष्ठायाशीशानभं श्रिवश्वादी यैतैर्नक्षत्रैः सशुक्रैः सितस्य शुक्रस्य च वार
कृतं गेहं धनानि सवर्णादीनि धान्यानि तंडुलादीनि तानि ददाति नाहर्षणं गृहं स्यात् यदाह वसिष्ठः
द्विदैवताश्ववारीशारुद्रादित्यवसूडुषु शुक्रेण सहितेष्वेषु कृतं धान्यप्रदं गृहमिति नारदोपि अश्विनी
शानतारासु विशाखाभाद्रचित्रके धनिष्ठादित्यभे शुक्रसंयुक्ते शुक्रवासरे गृहनाटकशालादेर्दे
वागारं कृतं शुभं तद्वेश्म निश्रजातस्तु श्रेवरसहर्षो भवेत् अत्रापि नक्षत्रभेदः प्रामवद्देव समाधिः २८
अथान्ययोगृहयमशुभमशुभफलदात् इन्द्रवज्रेन्दवसाह ॥ सार्कैः करेज्यान्त्यमघाम्बुमूलैः कौ
जेह्निवेश्माग्निसुतानिदं स्यात् सज्ञैः कदास्रार्यमतत्वहस्तैः ज्ञस्यैववारे सुखपुत्रदं स्यात् २९ हस्त
पुष्यरेवतीमघापूर्वाषाढामूलैः सार्कैः सूर्ययुक्तैः कौजेभौमसवाल्यिति वह्निवारेव कृतं वेश्मद

देऽग्निभ्रमनाग्निदं अग्निपीडाचतान्दहातितादृग्यः स्यात् यदाह वसिष्ठः पितृमूलेन्यभाग्यार्कयोस्तु
भेषु च यत्कृते ऽजेन सहितेष्विषु गृहे सन्दह्यतेऽग्निना नारदोऽपि मूले च रेवती चैव कृत्तिकाषाढमे
व च पूर्वाफाल्गुनी हस्ते च मघा चैव न संशयः एषु भौमेन शुक्रेषु वारेतस्यैव वेश्मयत् अग्निना
दह्यते क्षिप्रं पुत्रनाशश्च जायते इति अत्र विशेषमाह वसिष्ठेन अग्निनक्षत्रगे सूर्ये चन्द्रे वा संस्थि
ते यदि निर्मिते मन्दिरे नूनं अग्निना दह्यते चिरात् इति श्रावणपकत्वाहिहितनक्षत्रानुपलक्ष्योमध्य
मेषु भेषु गृहप्रारंभः शस्तः सकृत्तिकायां माभूदिति निषेधः सूर्येन क्षत्रे कृत्तिकायां माभूदिति निषेधो
पिसत्येवेति रोहिण्यश्विन्युत्तराफाल्गुनीचित्राहस्तैः सतैः बुधयुक्तैस्तस्यैव वारे च कृते गेहे संपद्व
देशपुत्रं च स्यात् यदाह वसिष्ठः हस्त्वार्यमत्वाष्ट्रदस्रवततरोस्यात् भेषु च बुधेन सहितेषु च यन
पुत्रसुखप्रदमिति २७ अथाशुभफलदमेकमेव योगमनुष्टुभाह ॥ अजैकपादहिर्बुध्न्यशाक्र
मित्रानिलान्तकैः समन्दैर्मन्दवारे स्याद्ग्रहोऽभूतयुतो गृहे २८ ॥ एवं भाद्रपदोत्तराभाद्रपदज्ये
ष्ठानुराधास्वातीभरणीनक्षत्रैः समन्दैः शनैश्चरयुक्तैः मन्दस्यैव वारे च प्रारब्धे गृहे रक्षोभिर्भू
तैश्च युतो स्यात् यदाह वसिष्ठः अजपाहितयेयाम्यमित्रेन्द्रानिलभेषु च यत्कृते शनिसंयुक्ते दि
ने न यक्षराक्षसैर्वृतिः दृश्यते उपवीयते ऽहिरुउपवं यत्रीनारदः ज्येष्ठानराधके चैव भरणीस्वा

म.
वा.टी
१५९
196

निर्गमे यति स्वास्यपिच्छेद्गृहनिर्गमेहिते स्वयं कृपतो नाम तत्र प्रोक्तायनयाम्यादिके गृहे पु
रोज्ञानोप्यवा तस्मिन्गृहस्ते यत्नासलेरिति श्लायं निष्क्रमार्थः एवं गृहद्वारे भेनलक्षणेपवर्धयेयानि न
तोहृषवास्त चक्रे व्याख्यानि पश्चादिदं यागपंचकं विचार्यमेवं सति गृहद्वारे भउक्तफललाभो भवेत्
अथ समवेपि गृहविचारः प्रासादवापीकूपादिषु ध्येयः उक्तो वविस्तु यमोऽत्रे प्रासादे ध्रुवमेवस्या
द्वापीकूपेषु चैवहीति प्रासादे देवगृहे २८ अथ कुंभावित्नतेन द्वारचक्रे सफलं शाहेलविक्री
डितेनाह ॥ सूर्यतारात्राभैः शिरस्येष्यफलं लक्ष्मीस्ततः कोणभेनींगे रुद्रसनंतनो गजमितैः
शाखास्तसौख्यंभवेत् देहल्यां गुणभैर्मृतिर्गृहपतेर्मध्यस्थितेर्वाब्धिभैः सौख्यं चक्रमिदं विलो
क्यसुधिया द्वारे विधेयं शुभं २९ ॥ अस्य द्वारस्य चत्वारः पाषाणाः शाखाद्वयं काष्ठौ द्वावूर्ध्वाधोभागेनाव
स्थितौ समावल्पपरिमाणौ भाषया उत्तरंगादलाधो वस्थितस्य संज्ञा अधोवस्थितस्य । सूर्याधिष्ठितमेन
तहेहलीति सर्वसाधारणं नाम मध्ये पार्श्वद्वयेवस्थितौ महापरिमाणौ वृश्यवेनमाहुः
ति भाषया हृयारपि संज्ञा एवं दीर्घचतुरश्रद्वारे भवति पाषाणसंभवे न काष्ठ
देरपि तत्र द्वारे विकीर्षिते सूर्याधिष्ठितनक्षत्राद्यकगभे स्वतनामंनेद्वे ३ शिरस्यव
स्थितैः सद्भिः लक्ष्मीः प्राप्तिरूपेफलं स्यात् ततस्तदग्रिमैर्नींगैः कोणभैः द्वयोरव

शिरः	४	लक्ष्मीः
कोणाः	८	उद्वासः
शाखा	८	सौख्यं
देहली	३	मृतिः
मध्ये	४	सौख्यं

स्थित्या चतुष्कोणेषु च स्थितैः रक्षःसंख्यैः कैर्नक्षत्रैः उद्वासनं तद्द्वारगृहे सर्वदा जनवासरहितं स्यात् तत
स्तदग्रिमैर्गुणैर्भैः स्थितैर्नक्षत्रैर्देहल्यामवस्थितैः सौख्यं स्यात् फलितार्थमाह चक्रमिति इदं द्वारचक्रं।
विलोक्य सुधिया शुभाशुभफलदातृद्वारविधियं कर्तव्यं तदुक्तं ज्योतिर्निबन्धे द्वारचक्रं प्रवक्ष्यामि भाषितं
विश्वकर्मणा स्वयं भाद्भवतश्चक्रं द्वारस्योपरि विन्यसेत् द्वे द्वे कोणे प्रदातव्ये शाखायुग्मे द्वयं द्वयं अधस्त्रि।
ीणि देयानि वेदा मध्ये प्रतिष्ठिताः राज्यं स्यादूर्ध्वनक्षत्रे कोणेषूद्वासनं भवेत् शाखायां लभते लक्ष्मीमथ
चैव मृतिं भवेत् मध्यस्थे शुभं वै सौख्यं चिन्तनीयं सदा बुधैरिति द्वारचक्रं यथा

२	४	२
४	४	४
२	३	२

अथ द्वारशाखारोप
णे अश्विनी चोत्तरा हस्ताः पुष्यश्रुतिमृगाः शुभाः स्वातीपौष्णंच रोहिण्यो द्वारशाखावरोपणे इति
ज्योतिर्निबन्धेऽभिहितत्वात् तिथयोऽप्यत्रैवाभिहिताः पंचमी धनदा चैव मुनिनन्दवसौ शुभं प्रतिपत्सु न
कर्तव्यं कृते दुःखमवाप्नुयात् द्वितीयायां द्रव्यहानिः पशुपुत्रविनाशनं तृतीया रोगदा ज्ञेया चतुर्थी भंग।
कारिणी कलहघ्नी तथा षष्ठी दशमी धननाशिनी विरोधकृत्त्वमावास्या पूर्णिमा न स्यात् शाखावरोपणमिति एवं स
निविरोधतिथौ विहाय विहिततिथिषु विहितभेषु चन्द्रतारापि चक्रशुद्धे शुभेषु द्वारे विहितं शुभफलदातृस्या
दिति निष्कृष्टोऽर्थः इति शिवं २९ इति गृहारम्भप्रकरणं गद्येनोपसंहरति ॥ इति श्रीदैवज्ञानन्तसुतदैवज्ञ
रामविरचिते मुहूर्तचिन्तामणौ गृहनिर्माणप्रकरणं समाप्तमगमत् ज्योतिर्विदां लीलं च इति श्रीवि

मु.
वाटी.
१८०
१९७

द्दैवज्ञमञ्चमणतालंकारनीलकंठज्योतिर्वित्तनयगोविन्दजेनानिर्मितविवाहविलिनामुहूर्तचिंतामणिटीकायां
पीयूषधाराभिधायां गृहप्रवेशप्रकरणं समाप्तिमगमत् ॥ ॐ लंबोदरं नमस्कृत्य गोविन्देन विदामुदे गृ
हप्रवेशप्रकरणं सम्यग्व्याख्यायते निमत अथ गृहप्रवेशप्रकरणं व्याख्यायते अत्रच तथा प्रवेशास्त्रयउक्ते
भागस्याभिः तत्र नववधूप्रवेशो विवाहप्रकरणेभिहितः अन्यः प्रवेशत्रयमुहूर्तोत्राभिधीयते नन्वयं
त्रातिवृत्तौ शुभदः प्रवेशानमित्यादिना सएव प्रवेशस्याभिहितनान्यप्रवेशद्वयमेव वक्तव्यं स्यात्तत्रप्रवेश
त्रयमित्युच्यते यात्रोक्तलग्नपतिनिवृत्तस्य भूपादेःपुनर्गृहंनगरादिः स्वान्नमपाङ्कतोदैवादागतस्य
स्थायिभूतस्य यथाकथंचित्कुमाशुभप्रकरणेपाथंवागशुद्धिविवाहोक्तपद्यविहितनन्तत्प्रवेशा
न्तः तत्रोविशिष्यताहशप्रवेशोकालशुद्धिः लग्नशुद्धिर्वोक्तेत्यतः सएवैस्यापिप्रवेशाभिधानं त
त्रपूर्वप्रवेशयोः कालशुद्धिमिन्द्रवंशावृत्तेनाह ॥ सौम्यायनेज्येष्ठतपोन्त्यमाधवे यात्रानिवृत्तौ नृप
तेर्नवेगृहे स्याद्वेशानेद्वास्थसुरार्चनोडुभिर्जन्मर्क्षलग्नोपचयोदये स्थिते १ ॥ पञ्च सौम्यायनइत्यादि के
चुपदार्थश्चसत्वान्नृपतेर्यात्रानिवृत्तौ अथवा नवेन्द्रतनोपनेगृहप्रवेशानंविधाप्रवेशनेप्रवेशानंस्यात्त
सौम्यायने उत्तरायणे अत्र शुक्रास्तवालत्वकोदोषा वाप्यारामतडागत्यादिनोक्तोनपुनरुक्तः पवंवीणा
स्युप्रतिष्ठेत्यादिना दक्षिणायननिषेधोपि अतः परिशेष्यात्सौम्यायनग्रहणसिद्धे तदुक्तिमन्दवुद्धीनां

पौष्णे प्रतिपन्नर्थं उक्तं च वसिष्ठेन अथ प्रवेशो नवमन्दिरस्य सौम्यायने जीवसिते च लग्ने इति नारदः अ
थ सौम्यायने कार्यं नववेश्मप्रवेशनं राज्ञां यात्रानिवृत्ताविति केवलायेभ्यो भूमौ कीलायां शङ्कायां स्वतः
सिद्धायां वस्यापितेशृहे नूतनमित्यत्याते ज्येष्ठेति ज्येष्ठमाघफाल्गुणवैशाखमासेष्वेव सत्यसु नराय
णे प्रवेशनं शुभं यदाह नारदः माघफाल्गुणवैशाखज्येष्ठमासेषु शोभनः प्रवेशो मध्यमो ज्ञेयः सौ
म्यकार्तिकमासयोरिति सौम्यो मार्गशीर्षः मध्यमो क्रियावश्यकविषयः चैत्रमासफलान्याह वसिष्ठ
माघेर्थलाभः प्रथमप्रवेशे पुत्रार्थलाभः खलु फाल्गुणे च चैत्रेर्थहानिर्धनधान्यलाभो वैशाखमा
से पशुपुत्रलाभः ज्येष्ठे च मासेषु परेषु नूनं हानिप्रदः शत्रुभयप्रदश्च शुक्ले च यदेशनतो विहृदेशमे
च यावद्दशमीं च तावदिति शुक्ले चेत्यादिना सुकरेष्वग्रम्यगमनाय तिथिशुद्धिर्नोक्ता तिथिवारशुद्धि श्राग्रे
वक्ष्यति वसिष्ठेन नवगृहप्रवेशः सौरमानमनुयद्दर्षितं यथा मृगादिपञ्चाशिशेषु संस्थिते ऽर्के नवप्रवेशः शु
भदः सदैव जूंभे विना न्येष्वपि केचिदाहुर्नेसौवमिष्टं खलु सन्निवेशः इति अस्यार्थः नूतनगृहप्रवेशो म
कराद्विपञ्चराशिसंस्थितेऽर्के शुभफलदो भवति तत्रापि माघादिषु विहितेषु चतुर्षु मासेषु शुभः नवप्र
वेशो नवसद्मनश्च सौम्यायने इति स्वयंप्राक् सौम्यायनेयुक्तं किमनेन पुनरुक्तमित्यत आह जूंभे विनेति
सन्यपुत्रनरायणेऽभसंक्रान्तौ नूतनगृहप्रवेशो न भवतीत्येतदर्थं पुनरुक्तमित्यर्थः तन्विदं प्रवीप्र

मु.
वा.सी.
१५८
198

विरुद्धं तथाहि माघेऽर्थलाभः प्रथमप्रवेश इत्यादिना माघफाल्गुनयोश्चान्द्रमासयोः शुभफलविधा-
नात् तत्रैव कुंभसंक्रान्तिसद्भावाद् द्वयोरन्यतरस्मिन् शुभत्वं प्रतिपद्यते उभयमासनिर्देशः कुंभस्थेनार्केणैवेति
चेत् उच्यते संति हि द्विविधाश्चान्द्रमासाः शुक्लादयः कृष्णादयश्चेति तत्र फाल्गुनपूर्णिमान्तरमासस्य
कृष्णादिमासगणनया चैत्रत्वात् तस्यैव विरुद्धफलत्वात् हि ष्ठ्यकोऽयं कुंभसंक्रान्तिनिषेधः चान्द्रमासस्य शु-
क्लादिकृष्णाद्यभिधायकानि वाक्यानि गृहारंभप्रकरणे समभिरूढानि अयमपि निषेधो मासस्य कृष्णा-
दित्वज्ञापकः अथ कर्कादिसंक्रान्तिशुभतान्तरमाह अन्येऽपि केचिदाचार्या अन्येऽपि कर्कादिषड्राशि-
स्थिते सूर्येऽपि नवगृहप्रवेशः कार्य इत्यूचुः तदेतत् तद्द्वंद्वसोऽपूर्विकागृहप्रवेशविषयम् तदुक्तं स्वयमेव
नवप्रवेशे सत्यकालशुद्धिर्नूतनद्वंद्वसोऽपूर्विकयोः कदाचित् नूतनतृणागारप्रवेशविषयं वा तदुक्तं ज्यो-
तिःप्रकाशे गृहारंभादिते मासेऽपि स्यैर्यवीर्यविशेषतः विशिष्टमास्याद्ययने द्वंद्वे तृणागारं तु सर्वदा इति ॥
अत एव कुलीरकन्यकाकुंभेऽपि दिने शान विशेषतः द्वंद्वं ग्रामे वा नगरे वापि पत्तने वासरापि पेति गुरुवाक्य-
मपि व्याख्येयं ननु पौषचैत्रादिषु विरुद्धकालेषु चान्द्रमासेषु विहितसंक्रान्तिश्चेत् तदा नूतनगृहप्रवे-
शः कार्यो वा न वेत्युत आह न सौरमिति खलु तत्र यत्र सौरमानेन सन्निवेशो गृहप्रवेशो नेष्टेन शुभफल-
दं विरुद्धशुभफलयोश्चान्द्रसौरमासयोः साहित्ये विहिता चान्द्रमासे एव गृहप्रवेशः कार्य इत्यलमति

प्रसंगेन द्वास्यति द्वारनक्षत्राणि भानि स्थाप्यानि अष्टिदिक्षु स्थित्यादिनो नक्षत्रानि मूढ़ानि ध्रुवाणि चो इति निश
सिद्धानि द्वाराणि च तानि मृदुध्रुवो हि निवेतिक मेथाद्रयः नाहृषो भैः प्रवेशानं शुभे स्यात् अयमर्थः
यस्मिन् गेहे प्रवेशः कर्तुमिष्यते तस्य द्वारं यद्दिगभिमुखं तद्दिग्द्वारैः प्रविहितैः प्रवेशः कार्यः यदाह
वसिष्ठः यद्दिग्द्वारं मन्दिरं तद्दिग्द्वारैः स्यात्प्रवेशो न सर्वैरिति उक्तं चाणाहमण्व चिरोत्तरा
यातु पाशांकमित्रवसंतत्यवारीम्बरभेषु नूतने आयुर्थनारोग्यसम्पत्प्रभो सत्कीर्तिदः स्यात्त्रिविधः प्रवेश
इति नारदः वृषेन्यात्येषु वरुणत्वाष्ट्रमित्रस्थिरोडुषु शुभः प्रवेशो देवेज्यशुक्रयोर्दृश्यमानयोर्दृ
श्यमानयोरिति सूत्रभाष्ये निशाने नारकापद्धतं निर्गृह प्रवेशविषये उक्तं च ज्योतिनिष्का
शे प्रवेशान्नूतने हर्म्यं युवेमैवैः सत्वा नघे शुष्यस्वाति शुनैस्त्रीणि स्याद्वासवहये पतङ्गस्य
हृदयिमपघ्ये वक्ष्यति अन्तमेवाशयमनिधायाह श्रीपतिः शुभः प्रवेशास्तङ्गमिश्र्वदेवैः द्विशेष्वरे
स्यात्तुनेवयात्रा उग्रैर्नृपो दारुणभैः कुमारो राज्ञी विधाग्रैस्तु विनाशमेति कृत्तिकाम्भव नेत्रशान्त
नादस्तत्र विशतां न संशयः यन्मुखे द्विसदनेन तत्कृतः स्वारभेषु शुभकृत्प्रवेशनमिति वसिष्ठोऽपि अ
कानिलार्याद् निदस्त्रविश्वसुरदेवपवित्रेष्ठेनवमन्दिरे यत् अग्रत्रयान्तरहस्तयाते शेषेषु पिशापु वसु
तिर्दस्यात् प्रवेशलग्नाद्य जन्मर्क्षेति जन्मर्क्षं जन्मराशिः जन्मलग्नं प्रसिद्धं ताभ्यामुपचयेत्ततीय

मु.
वा.टी.
१५५
199

षष्ठेकादशदशमस्थानेषु तथा स्थिरराशिषु वा यथाशुभलग्नगतेषु सत्सु नवगृहप्रवेशनं शुभं यदाह वसिष्ठः
कर्तुर्विलग्नादथजन्मराशेर्लग्नस्थितो वा स्थिररितिशुद्धिष्टः निर्व्यापि दारिद्र्यशशाङ्करास्त्ररोगात्रदः सिद्धि
कारोऽयदश्च क्रमाश्चैवेशामपदाः क्रमेण सदैव नूनं त्रिविधप्रवेश इति अनेनानिष्टफलमप्याह गृहप्रवे
शो राजमार्तण्डः कर्तुर्भोपचयगस्थे विलग्नेशराशयः शुभफलदाश्च भवन्तीति श्रीनारदः कर्तुर्जन्मर्क्षलग्ना
चाताभ्यामुपचयेऽथ वा प्रवेशलग्ने स्याद्धि शुभयोगे तनिः स्वतेति पुनर्वसिष्ठः सौम्येस्थिरे भेशुभदृष्टि
युक्ते लग्ने यथाशुभयोग गृहे विलग्ने इति सौम्ये सौम्यग्रहयुक्ते शुभयोगगृहे हि स्वभावराशौ मध्येविवाह प्रकर
णोक्ता एकविंशति महादोषा वर्ज्या इत्यपि ध्येयं एकविंशतिदोषाननुपक्रम्य वसिष्ठेनोक्तं कर्तुर्नोशे
गृहारम्भे प्रवेशे पतिनाशनमिति १ अथ जीर्णगृहादिविषयके प्रवेशविशेषमिदं वेशाछन्दसाह ॥ २ः
जीर्णगृहेऽग्न्यादिभयान्नवेऽपि मार्गोर्जयोः श्रावणिकेऽपि सत्स्यात् वेशोऽम्बुपेज्यानिलवासवेषु नावश्यम
मस्तादिविचारणात्र ३१ ॥ जीर्णे पुरातनेऽन्यनिर्मिते गृहे अथवा स्वीये नवगृहे अग्न्यादिभयात् अग्निकृत
भयं दाहः आदिशब्देन वज्रवृष्टिपातभय राजकोपाद्यैरन्यायुपद्रवैः पतितेषु गृहेषु पुनरपि सम्यक् नवे
कृते उत्थापिते गृहेऽपि शाक यथोक्तः सर्वेऽपि मासास्तादृशप्रवेशे ध्येयाः किंच मार्गोर्जयोर्मार्गशीर्ष
कार्तिकयोश्च श्रावणिकेऽपि मासि प्रवेशः सन् शुभफलदः स्यात् श्रावणेन नभः श्रावणिकस्य स इत्य

मरः यदाहुस्सनत्कुमारः गृहारंभोदितैर्मासैरपि स्यैर्वा वैशिषोह्य इति अत्र सामान्यतो गृहारंभोचिता
मासा गृहप्रवेशेऽभिहिताः ते चामी सौम्यफाल्गुनवैशाखमाघश्रावणकार्त्तिकाः मासास्तु गृहनिर्मा
णे उक्ता योग्ययनप्रदा इति नारदोक्तेः मार्गशीर्षफाल्गुनवैशाखमाघश्रावणकार्त्तिका विहिताः तत्र
उत्तरायणे एव गृहप्रवेशस्य वाक्यान्तरेण विहितत्वात् श्रावणकार्त्तिकमार्गशीर्षाणामुत्तरायणत्वाभा
वाद्धि शेषेन नूतनजीर्णगृहप्रवेशाभ्यां व्यवस्था कृष्यशागाभिहितनारदवाक्येनोत्तरायणमाहृष्टे वर्णनं न
नूतनगृहप्रवेशस्याभिधानात् उत्तरायणेऽपि मासास्त्रिविधगृहप्रवेशामध्यमनन्तमाह अथ देवजीर्णगृह
प्रवेशे उत्कृष्टतममध्यप्रवृत्ते संभुपः शततारकाः पुष्यः अनिलः स्वाती वासवधनिष्ठा यद्यपि भेषु जी
र्णगृहे आदिमयात्रेवपि गृहप्रवेशः शुभः शक्यचिन्त्य भमयवेति कैस्तुतिकन्यायेनावगम्येत उ
क्तं च ज्योतिःप्रकाशे प्रासादे नूतने हर्म्ये ध्रुवैर्मैत्रैः सवासवैः पुष्यस्वातिशतैः सैत्र जीर्णे स्याद्वासवह
येऽ इति नावश्यमिति अत्रैवेति येज्जीर्णगृहे आदिमयात्रेवहृते गृहे वस्तुमसत्यादिविचारणा शुभकास्त
एवं स्त्रवाल्यवार्द्धसिंहस्थगुरुलुप्तसंवत्सरादीनां दोषाणां विचारणा विचारो नास्ति अस्तादयः काल
दोषाः संत्यवाभावा तथापि गृहप्रवेशः कार्यः परंतु सोऽपि यथाकथंचित्यं वा ग्रशुद्धिमात्रमंगीकृत्य
विहितनक्षत्रेषु कार्यः वास्तुपूजा चैवं विधेऽपि गृहप्रवेशो भवतीति ध्येयं यदुक्तं ज्योतिःप्रकाशे प्रवेशे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मु.
चा. टी.
१००
900

नूतने हर्म्ये नित्यायने गृहे जीर्णे प्रायाने परिधानके च पूर्वप्रवेशो मांगल्यनमौपं गुरुशुक्रयोरिति वसिष्ठे
नाप्युक्तं नवप्रवेशे समयकालशुद्धिर्नेहेह सौम्यविकयोः कदाचित् प्रवेशपंचांगदिने सलग्ने वा स्वर्वं नेह
वेवदेवऊर्ध्वात् अस्यार्थः नूतनगृहप्रवेशे कालशुद्धिर्विचार्या नेहेह द्वन्द्वाभयाद्यो गृहप्रवेशः सौम्यविको
रोत्तायात्रासमाप्तौ गृहप्रवेशः तादृशयोर्गृहप्रवेशयोः कालशुद्धिः कदाचिदपि नापेक्षिता सतिसंभवे
सु[?]चेन्नास्ति किंतु प्रवेशदिनीयपंचांगशुद्धिसहिते सलग्ने गृहप्रवेशः कार्यः पूर्ववदेव एवं स्मिन्नाये नूतन
प्रवेशयथावास्तुपूजानुष्ठानेह सौम्यविकयोरपि कार्येत्यर्थः नारदस्तु यात्रानिवृत्तिप्रवेशकालशुद्धि
रपेक्षितैवेत्याह नद्याकांक्षागमिहिते नदेनयोर्वाकायोवाचयस्फानावपणकत्वेनव्यवस्था त्रयाणां गृहप्र
वेशानां लक्षणमुक्तं वसिष्ठेन अपूर्वसंज्ञः प्रथमः प्रवेशो यात्रावसाने तु सपूर्वसंज्ञः द्वन्द्वाभयात्स्त्वग्निभ
यादिजातः प्रवेश एवं त्रिविधः प्रदिष्टः इति एतद्व्याख्यानं यात्रानिवृत्ताविति पद्यव्याख्यानावसितनतप
वावधार्यं सूत्रे दृष्टेयं यत्त्रिविधेपि प्रवेशे प्रवेशादिते यत्रतत्र क्रूराक्रांतं क्रूरविद्धं तावत्सर्वं यावदपि सि
ति उक्तं च वसिष्ठेन क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधप्रवेशा इति २ अथ गृहप्रवेशादिना
त्याकर्तव्यावास्तुपूजाविवक्षस्तत्रत्वालग्नप्रजातिका एवोर्थेनाह ॥ मृदुध्रुवक्षिप्रचरेषु मूलभे वास्तु
वेनेभूतबलिं च कारयेत् ३२ मृदूनि ध्रुवाणि क्षिप्राणि चराणि नक्षत्राणि प्रसिद्धानि मूलभं च एषु मृत्र

दशास्वभेषु वास्तोर्वास्तुपुरुषस्यार्चने भूतबलिं च कारयेत् स क्रोशत्यन्तरमासामिति श्रुणोकतेः कर्मैते यस
हृत्कदेवोऽस्य यः चित्रा शात भिषा स्वाति हस्तः पुष्यः पुनर्वसुः रोहिणी रेवती मूलं श्रवणोत्तरफाल्गु
णी धनिष्ठा चोत्तराषाढा तथा भाद्रोत्तराणि च अश्विनी मृगशीर्षं च शतानुराधा तथैव च वास्तुपूजनमेतेषु
नक्षत्रेषु करोति यः स प्राप्नोति नरो लक्ष्मीमिति श्राद्धपराशरः इति वास्तुपूजायुक्कारमाह वसिष्ठः निर्मा
णे मन्दिराणां च प्रवेशे त्रिविधेपि च वास्तुपूजा प्रकर्तव्या यस्मात्तां कथयाम्यतः गृहमध्ये हस्तमात्रं समं
तान्तुलोपरि एकाशीतिपदं कार्यं तिलैरक्षतलं सशोभने एकद्वित्रिपदाः पंचचत्वारिंशत्सुरास्थितम्
द्वात्रिंशद्बाह्यगा देवा ब्रह्मणस्थान्त्रयोदश तेषां स्थानानि नामानि वक्ष्यामीश्वरकोणतः तत्राग्निरीशोभ्रको
णस्थत्वसौ चैकपदेश्वरः तस्माद्द्वितीयः पर्जन्यस्तु सावेकपदेश्वरः जयन्तेन्द्रार्कसत्याख्यमृशाश्च द्वि
पदेश्वरः आकाशाकाशपूर्वतः क्रमादेकपदेश्वरौ एवं प्राच्यां नवत्वानेवमेवान्यदिक्ष्वपि आग्नेयस्त्रा
स्त्रावेकपदौ द्विपदाः पंचमध्यगाः पूषाद्यसौयमान्ताः सुवर्णगायाम्यभागकाः आग्नेयस्त्रावेकपदे
द्विपदाः पंचमध्यगाः भृङ्गापि भृङ्गराजमृगैः पापान्ताः पश्चिमस्थिताः आद्यन्तौ ह्येकपादौ च द्विपदाः
पंचमध्यगाः रोगादिदित्यन्तसंस्थाः मत्तः सौम्यादिशिक्रमात् तत्रार्यम्याश्चतुष्कोणाश्चापनादिप्रवक्र
मात् आपः सवितृविजयरुद्रास्त्वेकपदेश्वरः मध्ये नवपदो ब्रह्मा तस्येशानादिकोणगाः आपावत्सा

स्तृ. वांटी. ५०१ 201

यमसविताविवस्वाथिपसंतकाः राजयक्ष्माववरवाः स्वराश्चैवपदेस्वब्रह्मणः पूर्वतोदिक्षुत्रिपदास्थाम
राश्चपिश्चार्यमाचविवस्वांश्चमित्रः पृथ्वीधरः क्रमात् सवस्वस्मुलेषुदेवेषुस्थापितेष्वीहशांमेवत् कोणेषु
पंचपंचैवचवतेष्वेकपदाः सुराः आपादिदिक्षुद्विपदाः पंचपंचयथाक्रमे ब्रह्मणः पूर्वतोदिक्षुत्रिपदाः
स्युःसमीपगाः हिरण्यरेतापर्जन्योजयंतःपाकशासनः सूर्यः सत्योभृशाकाशोवायुःपूषावितथो गृ
हक्षतःपितृपतिर्गंधर्वोभृंगराजकः मृगःपितृगणाधीशस्तथादौवारिकाह्वयः सुग्रीवःपुष्पदंत
श्चजलाधीशोनिशाचरः शोषःपापश्चरोगोऽहिर्मुख्योभल्लाटएवच सोमसर्पोऽदितिर्दितीहांत्रिंशदम
राःस्मृताः आपश्चैवापवत्सश्चजयोरुद्रस्तथैवच मध्येनवपदोब्रह्मातस्यैतस्यसमीपगाः प्राच्यांहि
तरितादेवाः परितोब्रह्मणःस्मृताः अर्यमासविताचैवविवस्वान्विबुधाधिपतिः मित्रोथराजयक्ष्माचत
थापृथ्वीधरःक्रमात् आपोवत्साष्टमःपंचचत्वारिंशाद्सुरोत्तमाः तांस्तैवस्वान्ननामानिब्राह्मणस्यसा
हितान्यसेत् वास्तोष्पतेवास्तमंत्रेणगंधपुष्पाक्षतादिभिः घृतेवर्णार्चयेदापिश्चथवास्वस्वनामभिः
शुक्लवस्त्रयुगंदेयंधूपदीपफलैःसह भूतेभ्यश्चबलिंदेयंवाद्यैश्चैवसमर्पयेत् तांबूलंचततोदद्याद्देवेभ्य
श्चपृथक्पृथक् दत्वापुष्पांजलिंचतोप्रार्थयेदास्वपुरुष वास्तुपुरुषनमस्तेस्तुभूमिसंस्थानतप्रभो
तन्गृहंधनधान्यादिसमृद्धंकुरुसर्वदा इतिप्रार्थ्यततोदद्याद्दक्षिणामथवैकायव विप्रेभ्योभोजनंदद्या

स्वयंभुंजीतबंधुभिः एवंयःकुरुतेसम्यग्वास्तोर्वैवशपूजयेत आरोग्यपुत्रपौत्रादिधनधान्यंलभेन्नरः
वास्तुपूजांचकुर्वाणः प्रविशेन्नवमन्दिरे भोगान्नानाविधान्भुक्त्वाप्राप्नुतेसर्वदास्फुटं इतिवसिष्ठसंहि
तायांवास्तुशांतिः विशेषस्तत्वसंहितायामवसेयः एवंभूतबलिरपिउपक्रमोपसंहारवर्जितोवास्तुशां
तिप्रकारः प्रयोगरत्नादिनाम्नीषुस्वस्वशाखाभेदेनभिन्नासुपद्धतिषुद्रष्टव्याः ग्रन्थविस्तारभयान्नेह
लिख्यतेइत्यलंमति प्रसंगेनकेचित्तुपंचांगशुद्धिमात्राश्रित्यसर्वेदिनएववास्तुपूजामाहुः यदाहना
रदः विधायपूर्वदिवसेवास्तुपूजाबलिक्रियामिति श्रीपतिः अथप्रवेशोनवमन्दिरस्ययात्रानिवृ
त्तावधिभूपतीनां सौम्यायनेपूर्वदिनेविधायवास्त्वर्चनंभूतबलिंचसम्यगिति २ अथलग्नशुद्धिंति
थिवारशुद्धिंचोपजातिकोत्तरार्धेनेन्द्रवज्रयाचाह ॥ त्रिकोणकेंद्रायधनत्रिगैःशुभैर्लग्नेत्रिषष्ठलाभे
षगतैश्चपापकैः ३ शुद्धाम्बुरंध्रेविजनर्भमस्त्योत्यक्तारिक्ताचरदर्शचैत्रे वामंरविंपूर्णविधुंचरंउर
स्वकृत्वाविशेद्गृहमभस्तृटभुंडे ४ ॥ नवपंचमप्रथमचतुर्थसप्तमदशमैकादशद्वितीयतृती
यस्थानानामन्यतमस्थैः शुभग्रहैः पूर्णचन्द्रबुधगुरुशुक्रैरुपलक्षिते तनुचंद्रस्यलग्नराशेरपिहि
तयेपंचतथातृतीयषष्ठैकादशस्थैः पापग्रहैः क्षीणचन्द्रसूर्यभौमशनिराहुकेतुभिरुपलक्षि
तेच लग्नाच्चतुर्थस्थानेऽष्टमस्थानेचशुद्धेसर्वग्रहरहिते अत्ररंध्रेयत्तमितंसनाहशैलग्र

मु॰
चिं॰टी॰
२०२
202

वेश्म गृहमाश्रितेन यदाह वसिष्ठः । केन्द्रत्रिकोणायधनत्रिसंस्थैः शुभैस्त्रिषष्ठायगतैः खलैश्च लग्ना
न्त्यषष्ठाष्टमवर्जितेषु चन्द्रेण लक्ष्मीनिलयः प्रवेशे इति अस्यार्थः प्रवेशलग्नाद्धनस्थितो यः क्रूरग्रहः
क्रूरपदृष्टः स्यात् प्रवेशकर्तुः मध्यत्रिवर्षाद्धन्यात् षड्वर्षैः शुभानपि गर्भादिति नारदः स्थिरे लग्ने स्थि
रराशौ नैधने शुद्धिसंयुते त्रिकोणकेन्द्रखत्र्यायसौम्यैस्त्र्यायारिगैः परैः लग्नान्त्याष्टमस्थानवर्जितेन
हिमांशुना प्रवेशः स्यादिति पूर्वेण संबन्धः गुरुः सप्तमे शुक्र सहाहे यात्रायामष्टमे तथा दशमेच
गृहारंभे च नश्येत् सन्निवेशने इति श्रीपतिनाप्युक्तं द्विस्वभावे शुभैः क्रूरैः षट्त्र्यायगैर्गुरौ लग्ने भृगौ वा
केन्द्रे वा स्थिरगृहप्रवेशो विधेयादिति केन्द्रस्य शुक्रनवांशकृतत्वापग्रहादिदित्पृक्तेत्यर्थः लग्नस्य गुरुः भृगो
रुक्तिस्तत्र विष्णुशर्मत्याभिधानाद्यो कीदृशो लग्ने विजन्मर्भे स्वर्याभे राशिः लग्नं च जन्मर्क्षजन्मकाले भे
जन्मभे ताभ्यामष्टमभवनं जन्मभं मृत्युर्यस्मिन् स्वजन्मलग्नात्स्वजन्मराशेर्वाऽष्टमो राशिः प्रवेश
लग्नगतो नायेदित्यर्थः पुनः कीदृशो व्यक्ता रविकाचवट पौषे च कीरो यसिद्धो वा रोरिक्ताः ष
।९।१४। उपलक्षणत्वादमावास्यातिथियोपिचरलग्नानि मेषकर्कटतुलामकराः उपलक्षणत्वान्नन्दशा अपि
दर्शो मावस्याचैत्रो मासः उपलक्षणत्वादाषाढो विगतानर्कोदयो यस्मिन् अर्कोदयः प्रवेशादिते
निविद्धः रात्रौ यदाह वसिष्ठः नैनेधने भेपि नवाष्टलग्ने पंचेष्टके व्ययमष्टमशुद्धिरिष्टके कार्यः प्रवे

घोनवर्गेशलग्ने शुभेक्षिते वाप्यथ संयुते वा रिक्ताममावर्दशतिथिंदिने शम्भुस्तनुषट्दूर्गो दिनेन्दु दृष्टिं
क्रूरग्रहाधिष्ठितं भं च विद्धं विवर्जनीयं त्रिविधप्रवेशे वारफलमप्याह समर्थ दर्शते श्रविशाना वमादि
रवेर्ह्निनानियतमेकवह्निभं भ्रमभिसहतवासरेतया शीतरश्मिर्द्विवसे हि हि हिंदं वेदज्ञाननिलवा
सरे शुभस्त्रीकरेस्तु सुखमहार्घ्यं लाभदे सूर्यसूनुदिवसे स्थिरमंदिरं किल तदीयरभयमत्र विद्यते यथानि
कृष्णमर्थमाह श्रीपतिः रिक्तातिथिर्भं स्तु नमानवा समैरातिं याम्ये योगाः परिवर्जनीयाः मेषः कु
लीरोमकरस्तुलाचरत्याज्याः प्रवेशेपितदान्तरेणाः इति निषिद्धलग्नफलान्यभिहितानि राजमार्तं
डे भूयो यात्रा मेषलग्नप्रवेशेनाशो गतः कर्कटेस्योदयच वाप्यितोलिन्याश्चिने लग्नवर्तिन्या कोक
वेवा प्रयाद्यावनाशे लग्ने न्यश्चाशाके प्वाप्ता मेषजडे हरुकलग्नेः शुभान्यन्यानि लग्नानि प्रवेशेम
नयो विधुरिति अन्यानि स्थिराणि हि स्वभावानि वउक्तं वस्तिष्ठेन पंचांगसंशुद्धिदिने दिनेशतारा
राबले वाष्टकवर्गशुद्धे सौम्यस्थिरे भे शुभदृष्टियुक्ते लग्ने च वा तद्गृहदेवि लग्ने इति राजमार्तंडे
विशेषः निर्दिष्टा स्थिरशुभो शसमेताः तौलिमेषमकराः सकुलीराः कर्तभोग्यचरगास्त्रवि लेश
राशयः शुभफलानि भवंतिरिति यत्तु सग्राहणशुद्धौ वक्र कालसहिष्णौ वा दृष्टव्यं शुभाशाः वृ
षमिथुनकन्याधनमीनानामेशाः इन्यघः कर्कतुलाशयाः स्वरूपतोनिषिद्धत्वात विशेषानरमाह

मु. चि. टी. २०३

203

वसिष्ठः यत्क्षीणचन्द्रोत्पथगस्पृष्टकेतुः पापेक्षितः पापयुतोऽथवा स्यात् कर्तुः श्रियं हन्ति स वत्सरेणाति
वर्षतः सोम्यनिरीक्षितश्चेदिति अथ राज्ञां यात्रानिवृत्तौ प्रवेशे यो विशेषो ध्येयः पञ्चमासे यात्रां कृता
तस्मान्नवमे मासि यात्रादिनान्नवमे दिने वा प्रवेशो निषिद्धोऽस्ति यदाह गुरुः निर्गमान्नवमे मासि प्रवे।
शो नैव शोभनः नवमे दिवसे चैव प्रवेशं नैव कारयेत् वामरविविधिं गृहप्रवेशसमये रविस्त्वयं वामे यदि
गाभिमुखोऽस्त्वेवं गृहद्वारामभागस्थो वेश्म गृहं विशेत् तथा पूर्वोग्रस्त्वसंमुखे पूर्णं च घटं जलघटं कलशं
उपलक्षणत्वात्पूगफलादिभिः पूर्णं घटं वा कृत्वा चकारस्यानुक्तसमुच्चयार्थत्वाद् ब्राह्मणांश्च सकल
शान्तिविधानं ब्राह्मणाग्रे कृत्वा स्वचगृहकपृष्ठगः कार्य इत्यनुक्तोऽपि विशेषो ध्येयः यदाह वसिष्ठः कृत्वाग्र
तः पृष्ठतो वामतोऽर्कं विशन्स्वजयानुग्रतः पूर्णकुम्भं दध्यक्षताम्रपल्लवान्वितैः स्त्रीभिः सार्धं स्रग्वीगीतवा
द्यैर्यात्रादिति गुरुस्तु वामगो गृहाभिमुखोऽपि निषिद्धः किं न पृष्ठगो दक्षिणगो वाऽपि भवत्याह यथा पृष्ठ
गं दक्षिणं वापि भं गृहं कृत्वा विशन्गृहं शोगवामगं वापि गृहं कृत्वा विशेन्न चेति अत्र कृत्दिक्कातस्य
यस्य वस्तोन च्छवदेवता ये विशेषान्तके तस्य गृहारंभप्रकरणोक्ताभिरुक्तं अयं च सर्ववर्णानां वि
विधेयपि प्रवेशविधिः राज्ञां यात्रानिवृत्तौ विशेषमप्याह श्रीपतिः कृत्वा विशन्सजलकलशांश्चाग्रतो
वामतोऽर्कं स्नात्वा स्रग्वी विमलवसनो मंगलैर्गीतवाद्यैः वास्तुं यात्राकथितशकुनैर्दोषमार्गेण राजा

हर्म्यं पुष्यश्रवणकरस्तचित्रे तोयराणाद्यैविरोच्येति कीर्तृरांभमकृतटशुद्धे मकृतेरेषसाष्टकारितेनशुद्धेउपलच
णात्वाहिवाहप्रकरणोक्तं वर्णोवपंतथातारावामादिकंचतेनापिशुद्धेपेये यदाहवसिष्ठः राशि
कूटादिकं सर्वेरेपत्याहिवचिंतयेत इति ५ अथावसरशान्तवाममगतार्कं तानेतिशियपरंतेनपूर्वाद्यभि
मुखगृहप्रवेशे चेदंवेशाच्छन्दसाह ॥ वामोरविर्मृत्युसतार्थलाभतोर्केपंचमेषुप्रवदनादिमन्दिरे पू
र्णातिथौ प्राग्वदनेगृहेशुभेनन्दादिकेयाम्यजलोत्तरानने ६ ॥ अष्टमपंचमद्वितीयैकादशस्थानेष्व
पंचसुस्थानेषुस्थितेरवौसतिप्राग्वदनादिकेमन्दिरेप्रवेष्टव्येगृहप्रवेशाकर्तुर्वामोरविर्भवेत् तद्यथा य
स्मिंल्लग्नेप्रवेशः कर्तुमिष्यते तस्मादष्टमेस्थानेतस्मात्पंचमस्थानेस्थितेसूर्येपूर्वाभिमुखगृहप्रवेश

पूर्वमुखेगृहसति	दक्षिणाभिमुखे	पश्चिममुखे	उत्तरमुखे
लग्नात् ।८।९।१०	लग्नात् ५।६।७	२ ३।४। ५	११।१२।१।२
११।१२। पंचसुगृहेषु	८ । ४ ।	६ ॥	३। वामः ॥
स्थितेसूर्येवामोर्के	नन्दायां	भद्रायां	जयायां
यः पर्वपूर्णायां	१।६।११।	२।७।१२	३।८।१३
शुभः ५	उत्तराफाल्गु	मैत्रे ८ षा	उभा रेवती
५।१०।१५	णी		
प वं तो ५			

कर्तुर्वामः सूर्यः तथाच यस्मिंल्लग्नेप्रवेशः कर्तुमि
ष्यतेतस्मात्पंचमेस्थानेतस्मात्पंचमस्थानेस्थितेसू
र्येदक्षिणाभिमुखगृहप्रवेशाकर्तुर्वामः सूर्यःतथाच
यस्मिंल्लग्नेप्रवेशः कर्तुमिष्यते तस्माद्द्वितीयस्थाने
तस्मात्पंचमस्थानेस्थितेसूर्येपश्चिमाद्यभिमुखप्र
वेशाकर्तुर्वामः सूर्यः तथैवच यस्मिंल्लग्नेप्रवेशः

मु.
विटी
२०४
204

कर्त्तुमिच्छेत तस्मादेकादशस्थानं ततः पंचमस्थाने शुक्रे सति उत्तराभिमुखगृहप्रवेशकर्तुर्वामः सूर्यः
श्चयवक्रोडारः उक्तं च वृन्दात्रेयाद्वनारायणेन स्वर्वे स्थितेन स्मात् पूर्वाशाभिमुखं वे गेहं विशन्नामो भवे
घत इति विश्वकर्म्माणि लग्नात्सागादितो दिक्षु द्वौ द्वौ राशी नियोजयेत् एकमेकं न्यसेत्कोणस्थं यवा वामे
विचिंतयेत् इति प्राच्यां लग्नाद्द्वौ राशी स्थाप्यौ कोणेष्वेकः पूर्णातिथ्यादिति शब्दवदने पूर्वाभिमुखे गृ
हे पूर्णातिथौ पंचम्यां दशम्यां पूर्णिमायां वा प्रवेशः शुभः नन्दादिके तिथिगणे याम्यजलोत्तराननेन गृह
प्रवेशः यथा दक्षिणाभिमुखे गृहे नन्दायां प्रतिपदि षष्ठ्यामेकादश्यां वा प्रवेशः शुभः जले पश्चिमा
दिक् तद्दिगभिमुखे गृहे भद्रायां द्वितीयायां सप्तम्यां द्वादश्यां वा प्रवेशः शुभः उत्तराभिमुखे जया
यां तृतीयायामष्टम्यां त्रयोदश्यां वा प्रवेशः शुभः इत्यर्थः यदाह गुरुः नन्दायां दक्षिणद्वारं भ
द्रायां पश्चिमामुखं जयायामुत्तरद्वारं पूर्णायां पूर्णतो विशेत् इति मूले नन्दादिके इति पदेनापवा
दिका रिक्ता गृहीता यद्यप्यामावास्या तथापि विदिक्द्वारनिषेधाद्दिग्वावतत्क्षेणवतत्पूर्णाद्वाराणां संभवा
भावरूपता निषेधाच्चारिक्तात्रयाणां संभवप व्ययः सोपि समतिवाक्ये स्पष्ट एव ७ ॥ अथ गृहप्र
वेशकालं शार्दूलविक्रीडितेनाह ॥ वक्ष्ये भूपविभागवेशसमये कुम्भे त्रिलग्नः शुक्रनाश
वामस्तु समेन कृतायमगतालाभः कृतः पश्चिमे सौवेदाः कलिकुन्तरे ऽग्रगामिता गर्भे विनाशो गृहे

कलशवास्तुशंका	
मुखे	१ दाहः
प्राग्ये	४ उद्वासः
दक्षिणे	४ लाभः
पश्चिमे	४ श्रीः
उत्तरे	४ कलिः
गर्भे	४ विनाशः
गुदे	३ स्थैर्यम्
कण्ठे	३ स्थिरत्वं

गमः स्थैर्यमतः स्थिरत्वमतुलाः कंठे भवेत्सर्वदा॥ कलशस्याष्टधा विभागाः परिकल्प्याः मुखे
कंठे गर्भे गुदे चेति चत्वारो विभागाः एवं दिक्चतुष्टयेन चत्वारो विभागाः एवमष्टौ स्युः तत्र विभागपर
पूर्वत्वेन सूर्यभात्त्रयन्यासफलमुच्यते ॐ मे कलशाकृतौ वास्तुनि रविभात्त्र
यं कोणतत्त्ववशादि तिल्य ज्ञापे पंचमी रविभसाम्भ्य नवत्र्यासः कृत्यर्थः नवक
लशस्य वक्त्रे मुखे भूर्के सूर्याक्रांतनक्षत्रमेव स्थाप्यं तत्फलं गृहस्याग्निदाहः त
तः सूर्यभात्कृता अग्रिमाणि चत्वारि भानि प्राच्यां स्थाप्यानि फलमुद्वासनं जनवास
स्थानवर्जितं गृहं स्यात् ततः कृतायमगतास्तदग्रिमाणि चत्वारि भानि दक्षिणस्यां
स्थाप्यानि फलं गृहपतेर्लाभो द्रव्यप्राप्तिः ततः कृताः पश्चिमेन तदग्रिमाणि चत्वारि
भानि पश्चिमायां स्थाप्यानि फलं गृहपतेः श्रीः प्राप्तिः ततो वृद्धा उत्तरेण तदग्रिमाणि
चत्वारि भानि उत्तरस्यां स्थाप्यानि फलं कलिः लोकैः सह गृहसंबंधेऽनिर्थकोवा वक्रदृक्‌ स्या
त् ततो गृहीतास्तदग्रिमाणि भानि चत्वारि गर्भे कलशमध्ये स्थाप्यानि फलं विनाशः कलशे
तोऽधस्ताद्गर्भोपाद्रातास्वाविनाशो भीर्णो विनाशार्तम्यः ततो गमस्तदग्रिमाणि त्रीणि भानि गुदे
बुध्ने स्थाप्यानि फलं स्थैर्यं गृहपतेः बहुकालं तत्र गृहे निवासः ततोऽनलस्तदग्रिमाणि त्रीणि भानि

मु:
विंटी:
२०५
205

केंद्रेष्वाप्यानि फलेष्विरत्वं सर्वदा गृहपते र्भवेत् एवमभिजिद्दहितानि सप्तविंशति भानि स्युः उक्तं च
विश्वकर्मणा चरोकारं लिवृश्चक्रं रविधिष्ण्यक्रमेणैव मुखैकं दिक्षु चत्वारि त्रीणि गुदे क्रं द्वयोः
एवं वक्रं समालेख्य प्रवेशार्थं सदा बुधैः अत्र वत्सारीति विस्पष्टा दशद्य्यानि दिक्षु स्थाने न गर्भे पुष्पफल
दाने तथा च फलनिर्देशस्त्वेव अग्निनाशं मुखे पीडा तदा स्मः पूर्वतो भवेत् दक्षिणे वार्थलाभाय
पश्चिमे श्रीः पदे भवेत् उत्तरे कलहश्चैव गर्भे गर्भविनाशनं स्थिरता वगुदे केन्द्रे कलशस्य कीर्तिते
ति ज्योतिःप्रकाशे भवेद्दयं चक्रं विधिः ।।१।।४।।४।।४।।५।।३।।३ प्रवेशोऽर्कभात् मूर्तिर्गतिर्धनेश्रीः ।
स्याद्वैरं कलिः स्थिरता सत्वमिति वेदयं वक्रं वेदवृषेत्वारस्तेषां पंचकं पंचवा रेवत्तारिमानि लेख्यानि
त्वर्थः मूर्ति इत्यादीनि अष्टौ यथासंख्यं फलानि अत्र कलशावके शुभफलदस्थान पूर्ते सन्त्यवावि
हितानन्दनाणापूर्ति एरण्डग्रामस्वापि गृहिः प्रवेश विपित्सिनित नहि इः प्रवेश विहितनन्दचप
रिग्रहः यथा पूर्वदिगभिमुखगृहप्रवेशाविपित्सिनेरा हिणी मेणापवशासे दक्षिणाभिमुखगृह
प्रवेशे उत्तरापरस्यातीयव पश्चिमाभिमुखे अनुराधायाग्नवाणक्षेत्र व उत्तराभिमुखे उत्तरभाद्रपदा रेवती
याम्या इति निकृष्टार्थः अनयवाक्यविशेषेन परिग्रहारमादिं तत दिग्गृहे कक्षोद्दे स्यात्सन्निवेशान
सर्वेति नहि गृहे रिति उक्तं तैरिति यानयोः सामानाधिकरण्येनान्वयः तदेकवाक्यत्वे नविव ।

ष्ठिते वकारः कर्त्तव्यः स्यात् संभवत्येकवाक्यत्वे वाक्यभेदो हि दूषणमिति न्यायात् अत एव अर्को
निलायां दिति दस्त्रविसृज्य रद्देशविशेषं नवमन्दिरं यत् शुभं त्रयाणां तत्राहस्तयानत पाषेउयिस्यपुवम्
तिष्ठेत् स्यात् इति निषेधोऽप्युपपन्नो भवति ८ अथ गृहप्रवेशकरणोपसंहारे स्वयं स्ववेशमस्का
लीनकर्तव्यं विधिमुपजात्याह ॥ एवं सुलग्ने स्वगृहं प्रविश्य वितानपुष्पश्रुतिघोषयुक्तं शिल्पि
ज्ञदैवज्ञविधिज्ञपौरान् राजार्चयेद्भूमिहिरण्यवस्त्रैः ॥ एवं शास्त्रप्रकारेण विचारिते सुलग्ने निर्दे
षबले सकलगुणयुक्ते च शोभनलग्ने स्थिरराशयादिके राजा वितानपुष्पश्रुतिघोषयुक्तं वितानानि मं
डपानि पुष्पाणि स्रजां नानाविधमालत्यादीनि श्रुतिघोषा वेदध्वनिस्तैर्युक्तं उपलक्षणत्वात्तोरणा
द्यनेकमङ्गल्यवस्तुसहितं मनोहरं स्वगृहं स्वसत्ताकं गृहं प्रविश्य पश्चात् शिल्पिज्ञान् गेहो
पकारान् स्थपतिवार्धकिकादीन् दैवज्ञान् ज्यौतिर्विदः विधिज्ञान् वास्तुपूजाभूतबलिगृहप्रवेश
नीयविधिज्ञान् पुरोहितप्रभृतीन् पौरान् नागरिकान् पंडितादीन् राजा यथाकल्पं तांस्तु भूमिहि
रण्यवस्त्रैः यथाशक्त्या भूम्यादिदानेन वा वस्त्रैर्वा सम्भावितैर्वा उपलक्षणत्वात् दक्षगजादिभिर्वा प्र
वेशयेत् पूजयेत् यदाह वसिष्ठः हर्म्यं रम्यं तोरणस्रग्वितानैः स्त्रीभिः स्रग्वीमेत्तवाद्यैर्विशेत् क्षिति
यजमानोऽपि भूरिपुष्पनिकरं सतोरणान्तोयपूर्णकलशोपशोभितं गन्धपुष्पबलिपूजितामरं

मु॰
चि॰टी॰
२८
206

ग्रामणाधुनिश्रुते विशेनुहमिति कीदृशं गृहं प्रवेशायोग्यं न भवतीति विशेषोवसिष्टेनाप्यथापि यद्वा।
न्तमजावहितं तदन्नबलिं च नाक्षतं तद्गृहं विरूपैकपाटहीनं न विशेषतस्तत्सर्वापदामालयमेव तत्
स्यादिति नारदेनापि एककपाटमनाक्षतं पदन्नबलिभोजनं गृहं न प्रविशेद्धीमान् विपदामालयं।
हि तदिति तस्मात्कपाटमपरिष्टाद्वाक्षादितं कृत्वा वास्तुपूजां दन्नबलिमेव गृहे प्रविशेत् प्रवेशानंतर।
कर्तव्यं विधिमाह श्रीपतिः तत्रोत्रपोविप्रसप्तमधपोयसःपिपलिरिच्य भागोलविदच्चलिलिगिनः यवेस्वरोवे :
पञ्चभिः समर्चयेत्सदान्नदीनान्द्विजवासिनूनं तथेति शिवं ॥ ज्योतिर्विद्वरनीलकंठ इति श्रीविद्व
द्दैवज्ञसज्जनालंकारश्रीमन्नीलकंठज्योतिर्वित्सुतगोविंदविरचितायां मुहूर्तचिंतामणिटीकायां
पीयूषधाराभिधायां गृहप्रवेशप्रकरणं समाप्तिमगमत् ॥ अथ मुहूर्तचिंतामणेर्ज्योतिषग्रंथस्य
समाप्तिकर्तृकामो ग्रंथकृत्स्ववंशवर्णनां कारयन्स्वपितामहचिंतामणेः स्ववत्तवर्णनं शार्दूलविक्री
डितेनाह आसीद्धर्मपुरे षडंगनिगमाध्येतृद्विजैर्मंडिते ज्योतिर्वित्तिलकः फणींद्ररचिते भाष्ये कृ
तातिश्रमः तज्जातकसंहितागणितकृन्मान्यो महाभ्भुजो तर्कालंकृतिवेदवाक्यविलसद्बुद्धिः
स चिंतामणिः ॥ स प्रसिद्धः चिंतामणिर्नामममात्तपूर्वविदर्भदेशापाविशेषमात्रपुरायां आसीत् की
दृशे धर्मपुरे षडंगनिगमाध्येतृद्विजैर्मंडिते निगमो वेदः षडंगानि यस्यासौ षडंगः षडंगानी मानि

शिक्षाकल्पोव्याकरणंनिरुक्तंछन्दोज्योतिषंचेतिषडंगस्सहितोनिगमःषडंगानिगमास्तस्याध्येता
वेध्ययनकर्तारः अध्येतृभिश्चाध्यापकाश्चपुष्पलब्ध्येतेनहिविनाध्यापकंवेदाध्ययनंक्वविदृष्टेना
दृशाद्विजाब्राह्मणाःब्राह्मणक्षत्रियवैश्यायेतेमेंत्रितेभूषिते कीदृशास्थिंनामणिज्योतिर्वित्तिलक
ज्योतिषनक्षत्राणिलक्षणयानक्षत्रियादकः ग्रस्याज्योतिःशास्त्रेनाध्यंतेतान्विदंतिजानंतीतिज्यो
तिर्विदः सन्तुहिषमादिनाक्रिय ज्योतिर्विन्नतिलकइवज्योतिर्विच्छ्रेष्ठः इत्यर्थः पुनःकीदृश
फलीन्द्ररचितेफणीन्द्रः शेषमहानागस्तेनरचितेभाष्येव्याकरणमहाभाष्यकृतानिश्रमेणाभ्यासो
येनसः महाभाष्याध्यापनपारंगमः इत्यर्थः पुनःकीदृशः नानाअनेकसंहितागणितकृत नानिनानि
स्वल्पबृहदादिभेदेन अनेकविधानिजातकानिजातकशास्त्राणिसंहिताःसंहिताशास्त्राणिगणि
तानिगणितशास्त्राणिकरोतितादृशः होरासंहितगणितरूपस्कंधत्रयात्मकस्यज्योतिःशास्त्रस
स्वपंथैर्निर्मितेइत्यर्थः अनेकमहाकवितापिसवितं पुनःकीदृशः महाभूभुजांसकलक्षोणीप
तिराजमुकुटमणीनांमहतांराजाधिराजमहाराजानांमान्यःपूज्यःमहाराजमान्यइत्यर्थः पुनःकीदृ
शः नवीनालंकृतिविदग्धवाक्यविलासबुद्धिः नवीनान्यायथासंख्यंअलंकृतिरलंकारश्चतेषुवित्तेषुविल
सेती विलासवतांबुद्धिर्यस्यसः इदानींतेश्रूयमाणापदंग्रंथैकपदप्रसिद्धिमेवदर्शयति इतिन्यायानर्क

मु॰
वि दी॰
२०
207

शास्त्रतः अलंकारशास्त्रतः मीमांसातो वेदांततस्त्वत्रार्थः आसीदिति अस भुवीत्यस्माल्लङि आड्
जादीनामित्याट् श्नसोरल्लोप इत्यकारलोपः षडंगानिगमाध्येतव्हिजैरित्यत्र समस्तपदशोधषडंगानि
गम इत्यत्र तत्पुरुषः समानाधिकरणः कर्मधारय इति कर्मधारयः समासः अध्येतव्यशब्दे चरद्
अध्ययन इत्यस्मादिटि कावप्युपसर्गेणानव्यभिचारात् इत्यस्त्वेकवचिपूर्वकात् ण्वुल्तृचाविति कर्तरि
तृच् सार्वधातुकार्धधातुकयोरिति गुणः ततो यणादेशः ततः षडंगानिगमाध्येतार इति षष्ठीति ब
ष्ठीसमासः ननु अत्र कथं षष्ठीसमासः यावता कर्तृकर्मणोः कृतीति कर्मणि विशेषषष्ठी ततः षष्ठी
शेष इति संबंधे सामान्यषष्ठी न च यदि विशेषषष्ठी तदा कर्तरि चेति कर्त्रीर्यान्यत्राभ्यां तृजकाभ्यां कर्म
षष्ठीसमासनिषेधप्रसंगः नचनत्रत्वमेवगीकृत्यैतद्दूषणमवयादपितमेव नांगीकुर्मः किं तन्न षष्ठी ला
धिकरणविहितत्वात् गणविधास्यामः उपयोगे आगवहे षष्ठीं विधाय षष्ठीसमासो भविष्यतीति वाच्यम्
यकं स्वत्विमतः परं प्रत्याव तेतित्याधेनलोकव्यनिष्ठावलर्थंतृणामिति योगे षष्ठीवनास्ति उक्तत्वात्
षष्ठीसमासः ननु च नायं तद्योगनिमित्तषष्ठीसमासः किं तर्हि षडंगमधीयते इति विग्रहस्य स्या।
नीते उपपादसनिर्दु इस्मत्पदसमासे कृते षडंगानिगमाध्येतार इति भविष्यत्येवं किंकाल्यगौनिवेण
सहूषणेन नचसोपपदत्वाऽलोत्यन्त जिस्थानेनालीनितबाच्यं हिमवक्षेना भावादित्यपश्चरत्यादिमहाभाष्य

कारप्रयोगे तु समाधाने स्यादिति तत एवेतर्हि कर्मण्युपपदे कर्मणीति त्वत्र प्रसज्येत तत्र खरेङ्गविग
माध्यायि इति स्यात् तस्माद्विशेषषष्ठीमङ्गीकृत्योपपदः खरेङ्गनिगमाध्येतार इति प्रयोगः सत्येव्या
पकाङ्क्षिविद्यति समासः किञ्चापकेजनिकर्तुः प्रकृतिरिति अनेन कर्तरि चेति षष्ठीसमास इति ए
षस्य मनसि निधाय समाधानमङ्गीकृत्य वा तस्य प्रयोगस्य गम्यकृत् अत एव भीष्मः कृतूणां भयपीत्यक
हृतां कालवक्रप्रयोक्तारं नैव सिद्धान्तकेत्यादये महाकविप्रयोगा उपपन्ना भवन्ति एवमेव विवाह
प्रकरणे भवति विवाहविनाशकारको यमिति पापोकर्तरि कारको इत्यत्र विवाहविनाशकारक
इति कर्तरि कारकादि त्यनयोः प्रयोगयोरिदानीमङ्के पूर्वपदे योजयित्वा तत्प्रयोजको हेतु श्चेति ताप
कारिणि षष्ठी त्यक्त्वमङ्गीकृत्य समाधिरङ्गीकार्यः अत एव निजविनैत्रावृत्त रवेधिकामिति प्रयोगो
पपत्तिः यदि तु संबन्धमात्र षष्ठीमङ्गीकृत्य षष्ठ्याकर्मकभावादेव कर्तरि चेति निषेधाभावात्तेनैव षष्ठी
समासः अथवा खरेङ्गनिगमाध्येतृशीलयेषां ते इति विगृह्य तच्छीलादिका रवि हितेत्यां विधाय ग
म्यादीनां इति गम्यादीकृति गणात्ताद्धेनो यागः अव भावात् सद्वितीयान्त रूपः समासः इत्यल
मति प्रसंगेनेति शिवं ॥ १८ ज्योतिर्विज्ञाणवीटेना त्रिविक्रम तस्य नत्त्वगमोत्कृतो नाम्नाने इति ष
धामपि गतो भूमेः तादृक्करः यो रम्या जानपद्धति समकोट्टप्रापध्वंसिनी टीकां वा नम काम येव

मु. विंटी. १८

208

गणितेकार्थोत्सनांश्रीतये ॥ ॥ तत्सूतकस्यविंनामगणितेदैवज्ञस्यनुतः श्रुद्धोनेनइतिशेषः व्याख्यानः
शम्भः श्रासीत् कीदृशः ज्योतिर्विदंगणवन्दितत्रिकमलः ज्योतिर्विदांज्योतिषकारणयोगणः सम्
हस्तेनवन्दितंत्रिकमलचरणमस्तेतरहेयस्यतादृशः सकलज्योतिर्विदांज्योतिः शास्त्राध्ययनेयएव
वाध्यापकस्तथ्यः पुनः कीदृशः भूमंडलस्करः भूमंडलस्यपृथ्वीमंडलास्यास्करः सूर्यः प्रकाश
कत्वात्यथासूर्यः स्वकिरणैरखिलांपृथ्वीप्रकाशइति तथाज्योतिःशास्त्राध्यापनद्वारप्रज्ञोः प्रकाश
कइतिभावः पुनः कीदृशः कृतीरुपालुः कृतीरुपालइत्यपीन्युमरः नानाग्रन्थकरणकुशलइत्यर्थः
ग्रन्थकर्तृत्वमेवाज्ञार्थेनप्रकाशयतियोरस्याभितियोनंतः जनिपद्धतिं जनिर्जन्मजन्मजेनतज्जन्मा
निजनितत्यत्रिरूद्धवः इत्यमरः तस्यपद्धतिमार्गः भावादिनानादर्शनेनगणितेनजातकशास्त्रो
क्तशुभाशुभफलकालोपदेशप्रतिपादकोग्रन्थोजन्मपद्धतिः सामसमकरोत्स्मपचक्रकारसम्य
क्त्वमेवाहकीदृशीजनिपद्धतिंडष्टाशयश्रेसिदीडष्टाजन्मपद्धतिशागंसप्रदायानभिज्ञास्तेषामा
शयोभिप्रायोयुक्तावेपरीत्याख्यानेनतंश्रुसितंशीलंयस्याः सानाहशीयथाश्राद्यादशावत्सविन
विंधौर्वानतदाफलंसंस्कृतमेवतस्यतिश्रीपतिवाक्यैः संस्कृतमिष्टकालबलांतरेणगुणितमिति
जातकालंकाराख्याटीकाकृताव्याख्यातंतत्रापिशार्मापद्धतिवाक्यैसमतिविनदर्शितंतदुभयस्म

पि विंत्यचिंत्यप्रकारस्त्वत्प्रसादपूर्वकः स्वपद्येदेवोपनिबद्धः यथा ॥ यद्दृष्टकर्षणेनानिन्द्यवीर्योदृष्ण
कर्मेरिष्टमनिष्टमंगे वपेपविचारयेतीहजनमोऽस्तु तेभ्यः श्रीश्रीयदोक्तंबद्धसेमतेसत यस्येष्टकोष्ट
सहृष्णभवेनां तदंतरग्नेबलदेवस्मृत्य तदानदासोवलवानवीर्यवेरयंविचिंत्याशुभदोचितेहि यतः
शुभेवाप्यशुभं ग्रहस्यसदैवालिनतत्सहानिः तस्मात्रनाशेविवरेनयोऽस्त्वदेयफलाप्यनदर्शनाक्र
मादाविति यवमनेकेशुभ्यलेषुडृष्टाशयानिवाकरणंकृतमिति अतयवरम्यादोषापकरणेनाति
स्वल्पीयथान्यापि राजादिपद्धतिमार्गेचोरादिदुष्टनिराकरणेनातिस्वल्पंकरोतीतिध्वनिः किंच
यतन्नमकामयेनुगणितेऽन्नमसत्यर्थेन स्वलायमूदपन्नीयपंचांगानयनप्रतिपादकंतत्ज्ञाकामये
न नामकेगणितमाशास्त्रंतत्रटीकांतदभिप्रायविहृज्ञिमकार्षीत् किमर्थंसतोगणितशास्त्रा
भिज्ञानोधीतयेतनुष्ठेयस्त्रेननास्यानेकग्रन्थकरणप्रयासकर्तृत्वेनस्वार्थमत्याभ्यासेनदृष्टतर
ज्योतिःशास्त्राभिज्ञानात् किंतु मतस्यपूर्वमेव यावत्सर्वी यथा स्वाभ्यासो ग्रन्थकरणद्वारान प्रका
शते तावत्सकलमनुष्ठितं भवतीत्यनेकग्रन्थकरणप्रयासइति स्वस्तिनेकृतीति अतइतिध्वा
वितीतिः नव्वीकाराकृतोजातः सप्तमं चवनेनास्तनाविस्तुतेः कृतयाहृस्यकृदंतनवालक्षयम
क्रोतिःउच्यतेनायसमस्थयः कैतोजातेस्यातिकिंतर्हिजातिविशेषणकेकृतृहृणवयोजाति

रिति एवं चकार्षीः कारिकाः तंडुलीतंडुलीकरणं पिपिक्षिषति तेन व्याघ्रवानित्यादावेव नियमो नत्वि
षेपानान्यत्रेति महाभाष्यकारेण वार्तिकव्याख्यानाद्भवत्येवाड्गेतिः अट्स्वकाइति दिवाविभाति
शोत्यादिनाकर्मण्युपेनोवायकष्टप्रत्ययः समकरोत् उक्तमकरोदित्यर्थमात्सपूर्वादनद्यतनेलङ्-
इतिलङ् अकार्षीदिति तस्मादेवाप्नोतेः लटः। ञिसिचसिचिवृद्धिः परस्मैइतिवृद्धिः तवण वे
रइतिपरेसूत्रं ५ अथस्वनामकथनपूर्वकं मंगलं सूचयन् मुहूर्तचिंतामणिनामकं ज्योतिषग्र
न्थसमाप्तिं श्लोकमाह ॥ तदात्मज उदारधीर्विबुधनीलकंठानुजो गणेशपदपंकजं हृदिवि
धाय रामाभिधः गिरीशनगरेवरेभुजभुजेषुचंद्रैर्मिते शके विनिरमादिमं खलु मुहूर्तचिंतामणिं
तदात्मजस घानेनज्योतिर्विदात्मजः रामोरामाभिधो नामसेवकोगिरीशनगरेशोमहादेवस्तस्य न
गरे वाराणस्याख्ये मुहूर्तचिंतामणिं मुहूर्तचिंतामणिनामकं ज्योतिषग्रंथमिमं प्रत्यक्षदृश्यं वि
निरमादकार्षीत् खलुशब्दोवाक्यालंकारे कीदृशो रामाभिधनउदारधीः उदारा अनेकशिष्यविद्या
दिदानकारिकाधीः बुद्धिर्यस्यासोतथा पाठितानेकशिष्य इत्यर्थः पुनः कीदृशः विबुधनीलकं
ठानुजः विबुधः ज्योतिषव्याकरणाद्यनेकविद्यायां पंडितो नीलकंठस्तस्यानुजो लघुभ्राता किंकृत्वा
गणेशस्य स्वजलोयास कस्यमहूगणपतेः पादपंकजं चरणकमलं त्वात्मभिप्रायेण कवचनेनामणे

परपंकजे इत्यर्थः नेत्रयोषेतः कुर्वाणो निधाय संस्थाप्य पुनर्ग्रंथांते मंगलाचरणं शिष्टाचारानुसारेणात
मंगलादीनि मंगलमध्यानि मंगलांतानि च शास्त्राणि प्रथंते वीरपुरुषाणि आयुष्मत्पुरुषकाणि चे।
ति महाभाष्यकारोक्तेः स्वकीयहृदयाभिगिरीशानमगवे रमोक्षदातृत्वेन श्रेष्ठेयं पुर्यपि अयोध्यामथुरामा
याकाशीकांचीअवंतिकापुरीद्वारवती चैव सप्तैता मोक्षदायका इति वाक्यमोक्षरूपफलप्रदत्वेन
अयोध्यादीनां नगरीणां साम्यमेव प्रतीयते तथाप्यन्यानि मुक्तिक्षेत्राणि काशीप्राप्तिकारणानि वैका
शीप्राप्य विमुच्येत नान्यथा तीर्थकोटिभिरिति वाराणस्या विशिष्य मुक्तिप्रदत्वेनाभिधानात् श्रेष्ठत्वा
द्वाराणस्याः। नन्वयोध्यामथुरामायेत्यादिवाक्यस्थान्यानि मुक्तिक्षेत्राणीत्यस्य व्यासवचनेन तत्साम्यादेक
स्य साम्यापादकस्य काशीमुक्तिदातृत्ववचनस्याप्रामाण्यमिति भाति उच्यते अयोध्यादीनि तीर्थानि सम्य
क् ज्ञानोत्पादनद्वारा साक्षान्मुक्तिप्रदानि अन्यानि मुक्तिक्षेत्राणि मुक्तिप्रदेशप्रदानान्तु न गर्भवा
सं च प्राप्स्यतीति काशीतु सर्वेषां ज्ञानानां दत्त्वा लाभकेनाप्युपायेन वा मरणान्तरं मुक्तिमेव प्रयच्छतीति न पु
नर्गर्भवासं यदुक्तं पद्मपुराणे तीर्थान्तराणि क्षेत्राणि विष्णुभक्तिश्च नारदेंतःकरणस्य शुद्धिं जनयन्ति
न संशयः वाराणस्यां पुनर्देवि येषामन्ते शिवपदं नरः प्रकाशयति विश्वेशं तारकं सोपदेशतः काशीखंडे
अविमुक्ते रहस्यं तन्मच्छ्रुत्वा मृतानि तेनानराः अन्यत्र नापि निर्यान्ति मुच्यन्ते हि सकल्मषाः इति अन्यच्च

मु॰
वि॰ दी॰
२१०
210

वाराणस्यां श्रेष्ठं यतद्वयमभिहितं पद्मपुराणे नैमिषे च कुरुक्षेत्रे गंगाद्वारे च पुष्करे स्नानात्संसेवना
द्वापि न मोक्षः प्राप्यते नरैः इह संप्राप्यते यत्तत्तत्र यत्तद्विशिष्यते ॥ इह का पण्यां किं च काश्यां मरणे।
कालकृतोऽपि विशेषो नास्ति उक्तं च काशीखंडे उत्तरायणे दक्षिणे वापि यः प्रयत्नेन विचारयेत् सर्वोऽप्यस्य शु
भः कालो यस्मात्काश्यां म्रियते जनः इति देशविशेषोऽपि नास्त्यत्र नास्तीत्युक्तं सनत्कुमारसंहितायां रथ्यान्त
रे मूत्रपुरीषमध्ये चंडालवेश्मन्यथवा श्मशाने कृतप्रयत्नोऽपि न वेत्र मन्त्र्ये देहावसाने लभतेऽमोक्ष
इति अन्यच्च भूमौ जले वा विहितं वा यत्र क्वापि मृतो द्विजः ब्रह्मानन्दमवाप्नोति काशीप्राणांस्त्यजन्हि ते
ति नाप्यत्र दुर्मरणे दोषोऽस्ति तदुक्तं पद्मपुराणे स्वेच्छयाप्यागमाच्च यदि नास्ति मृगमासप्रदेशस्मिन्स्थाने स्वरेच्छ
या न सत्त्वमयत्र मुक्तिः भूमौ जले वियति वा शुचिमध्यतो वा सर्वाग्निदस्युपविभिर्निहतस्य जंतोः विति।
पविवेत्रवज्रमहोष्माक्कलिशामिद्रूपविविन्नमरकाशीकेः अतएव ब्रह्मवैवर्ते अप्रतिवचनात्काश्या
वाराणस्यां विशेषोऽभिहितः यथा जितेंद्रियः पापविवर्जितश्च शांतो महात्मा मधुसूदनाश्रयः श्वेत
पुनौऽपि यत्रपि मुक्तिभाजो भवंति काश्यामपि को विशेषः इति दीपकृष्णगुरुणा उक्तं न विशेषस्त्वल्प
वद्यामि काश्यां कथयतो मम कृतानि या पतनात्यत्र स्वल्प्यान्यपि महामते भवंति काशीमाहात्म्यात्
सिद्धान्येव न संशयः अन्यत्र साधुभिः कृतैः कृतैर्मच्यो तवानवा अत्र साधनवैकल्ये काशीसंभित्र कल्पयेत्

इति श्रुतेर्भावः सा च न संपन्निमित्ता मृषिकादीनां काश्यपमितिहेतोपि हेत्वेन मुक्तिः काश्यां तेषामपीति अत
एवोक्तं काशीखण्डे संसारभयभीता ये ये बद्धाः स्वकर्मबन्धनैः तेषां क्वापि गतिर्नास्ति तेषां वाराणसी ग
तिरित्याद्यनेकपद्यैः काश्यां महत्त्वमुक्तं अत्रार्थे येऽर्थवादमाहुस्ते नास्तिका मे न व्याः तदुक्तं काशी
खण्डे यत्र विश्वेश्वरो देवः साक्षात्स्वर्गतरंगिणी मिथ्यात्वं न मन्यन्ते ते नास्तिकास्था नसूयकाः उदाह
रन्ति ये मूढाः अनन्तफलदर्पिताः काश्यां सर्वार्थवादोऽयं ते विकीटा युगगुरो विट्विष्ठाः अत्र च ब्र
ह्मवैवर्ते मा जानीतार्थवादत्वं काश्यां मुक्तिविनिर्णये इति तस्मात्सर्वापि काश्यां मरणान्मुक्तिरिति
सिद्धं काशीखण्डेपि ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वै वर्णसंकराः कृमिम्लेच्छाश्च ये चान्ये संकी
र्णाः पापयोनयः कीटाः पिपीलिकाश्चैव ये चान्ये मृगपक्षिणः कालेन निधनं प्राप्ता अविमुक्ते शृ
णु प्रिये चन्द्रार्धमौलयः सर्वे ललाटाक्षा वृषध्वजाः इति तथा अकामो वा सकामो वा तिर्यग्योनिग
तोऽपि वा अविमुक्ते त्यजन्प्राणान्मम लोके महीयते इति अन्यस्थमरणेन तत्सालोक्यादिचतुर्विधा
मुक्तिः पञ्चक्रमेण भवति न पुनर्गर्भवासः उक्तं च पद्मपुराणे काश्यां मृतस्तु सालोक्यं सामीप्यं वाप्नोति
सत्तम ततः सारूप्यतां याति ततः सान्निध्यमश्नुते ततो ब्रह्मैकतां शिवाभेदतां एतच्चतुष्टयापि तत्रैव स
लोकतां च सारूप्यं सान्निध्यं वापि सत्तमाः कल्पं कल्पमवाप्नोति ततो ब्रह्मात्मको भवेत् इति अन्ये

स्तु.
विरी.
२११
४।

तत्क्षेत्रभेदेन सालोक्यादितारतम्यं यत्तदप्युक्तं पद्मपुराणे वनविंध्येपिदेहेस्मिन्मीतो गार्ग्य यातनां
नैवाप्नोति मुनिश्रेष्ठ विशेषोयं ब्रवीमि वः इति तत्र काष्ठात्मके क्षेत्रे सालोक्यमुक्तिः वाराणस्यात्म
के क्षेत्रे सारूप्यमुक्तिः अविमुक्तात्मके क्षेत्रे सान्निध्यमुक्तिः अंतर्गेहात्मके क्षेत्रे कैवल्यमुक्तिः उक्तं
च पद्मपुराणे चतुर्थाविततेक्षेत्रे सर्वत्र भगवाञ्छिवः व्याचष्टे तारकं वाक्यं ब्रह्मात्मैकप्रबोधकं का
ष्ठे मृतस्तु सालोक्यं साक्षात्प्राप्नोति सत्तमः वाराणस्यां मृतो जंतुः साक्षात्सारूप्यमश्नुते अविमुक्ते
विपन्नस्तु साक्षात्सान्निध्यमाप्नुयात् अंतर्गेहे विपन्नस्तु साक्षात्कैवल्यमाप्नुयात् साक्षाच्छिवस्वरूप
एव भवतीत्यर्थः काष्ठादिक्षेत्रपरिमाणानि पद्मपुराणे यथानालखंडे परिमाणं च वक्ष्यामि तद्विबो
धत सत्तमाः मध्यमेश्वरमारभ्य यावद्देहलिविघ्नपं सूत्रं संस्थाप्य तद्दिक्षु भ्रमयन्मंडलाकृति तत्र
या जायते रेखा तन्मध्ये क्षेत्रमुत्तमं काशीति यद्धि वेदांतैस्तत्र मुक्तिः प्रतिष्ठिता काष्ठेन परमे क्षेत्रे
विशेषफलसाधने वाराणसीति व्याख्यातं तन्मानं निगदामि वः विश्वेश्वरवनदिक्षुः पुनः पाव
प्रमाणमितं अविमुक्ताधिकं क्षेत्रं मुक्तिस्तत्र न संशयः गोकर्णेशः पश्चिमे स्यात्पूर्वेण स्वर्गंगामध्ये स्तु नै
भारभूतः ब्रह्मेशानात् दक्षिणेस प्रतिष्ठस्तु प्रोक्तं भवते विश्वभर्तरिति काशीपरिमाणवाक्ये मुक्ति
पदं सान्निध्यमुक्तिपदं अविमुक्तपरिमाणवाक्ये मुक्तिपदं सान्निध्यमुक्तिपरं एवाभिहितं वाक्यैकवाक्य

तावत्त्वात् अस्मावाराणस्यायतनस्यतदेशलमिति एवंसति विन्ध्यस्यदक्षिणतो नर्मदाया उत्तरतइत्यसि
तमेतस्यार्थः विन्ध्यभर्तुर्भवतेश्रुतगृहे ततश्चयथायथाखलोनां सालोक्यसारूप्यसान्निध्यकैवल्या
ख्यानां सर्वेषां देवतानां परिपाकस्थले तेनयानेनयथाकाशीवाराणसीश्रविमुक्तेति नामाख्यानानां तत्तद्देश
तो देवेषूत्तमभावविशेषदेवानां नृपतीनां परिमाणमिति संपिण्डितोऽर्थः तस्मात्सर्वमथुरादिमङ्क्ति
पञ्चपञ्चयशाकाशोभूषेति सिद्धमिति शास्त्रानुसमानतः नतुकस्मिन्कालेयं शब्दः कृतइत्यनआ
ह भजेति भजोहायनप्रविभजोहायनकः एवंवर्षाशकः भजभुजेश्वेतद्वावर्तकार्थः शका
नां वामनो गतेरिति देवश्रीसम्राद्यागतवानात् हाविंशत्युत्तरपञ्चदशशतीनवसामितेग
णितेशाके शाकाख्यवनास्तेषां स्वामिलक्षणया शाकशब्देनापपन्ने तस्यापिलक्षणया शाकशब्दे
न राज्यशान्तिसमयानन्तरं वर्षाणि प्रोच्यन्ते एवंसतिलक्षितलक्षणया लोकव्यवहारमूलभूताय
मयं अनुभूते तत्र निखिलभूपालचूडामणेः शालिवाहननृपस्य राज्यशासिन इदानीं तनायप्र
विशालेपि यावत् देवोनानीतस्य यज्ञे शास्त्रीमिति गतेकाले जातातस्यारभ्य शालिवा
हननृपशकाले ग्रन्थकरणसमये हाविंशत्युत्तरपञ्चदशशतीतो १५२२ मितोगतोभूदतयताव
तं संख्याकेशककाले प्रवृत्तिः अतएवभास्कराचार्यः शाकोनरेन्द्रात्मकनात् कलेर्भवत्यत्र गा।

मु. चिं.
२१२
212

णाख्यग्रन्थ इति । यच्छालिवाहनन्टपशाककालो ग्रन्थकरणसमये द्वाविंशत्यधिकपंचदशशतीमि
तो गतोऽभूत् एतावत्प्रमाणके शाककालेऽतिक्रान्ते सति रामज्योतिर्विन्मुहूर्तचिंतामणिनामकं ज्यो
तिषग्रन्थं काश्यादिनिवासे ।। अथ ग्रन्थकृन्मूलप्रवेशप्रकरणगणेनोपसंहरन्मुहूर्तचिंतामणि
नामकज्योतिर्ग्रन्थसमाप्तिं करोति ।। इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्तचिंताम
णौ गृहप्रवेशप्रकरणं मुहूर्तचिंतामणिश्च समाप्तः स्पष्टार्थम् ।। कीर्त्याविद्योतिताशा द्रविण
वितरणैरर्थिनो ... ज्योतिर्विद्वृन्दवर्यो निखिलवसुमतीमंडलामंडलश्रीः २ ... ख्यातबुद्धिर्हि
मगलनिलकोऽभूद्विदर्भाख्यदेशे ज्योतिःशास्त्रारविंदप्रविकसनरविश्चिंतामणिः सः ।१।
तस्मात्मजोऽभवदनंतउमामनूजपादारविन्दमकरन्दमधुव्रतो यः ज्योतिर्नतेर्यत्त्रिनयनेन हठाद
वाप्य येन त्रिकालविदुषा खेलगर्भभावः २ तत्सूनुर्नीलकंठः शतपरिकलनाजेठिनशोफ
बुद्धिर्ज्योतिःशास्त्रकसिंयोर्घटनविघटनासंगधाताबभूव यस्योक्तग्रन्थसिन्धुच्छलनमद
लकणाकर्णनेनापि लोके गर्गोचार्यो हि यस्मिन्नवयति जगति प्रौढभावं निनीते ३ रामोऽनुज
स्तस्य बभूव काश्यां यस्तातकस्वज्योतिषनात्रिबन्धात् निपीतसौहित्यमुपेत्य सन्तः सधांसुधा
विन्दति विंडहृद्यं ४ श्रीमन्नृपतिशालिवाहनशाके चन्द्राक्षशाके मिते मासीषेपक्षे दलेनग

१४९१ ...

मु.
चिटी

त्रिंशेतिरमां शुवारे दितौ यर्भज्योतिषशास्त्रपाणिनिमहाभाष्यादिपारंगमात्संभूतः खलु नील-
कंठविडंवेगोविन्दनामा सूनुः ५ शाकेतत्वतिथीमिते शुभगणपत्यौ नीलकंठात्मभूर्डुंगपाविं
निखिलार्थयुक्तममलं मौहूर्तचिंतामणिम् काश्यांवाक्यविचारमन्दनगेनामाहलेखक्रियं
गोविंदो विधिवत्करोति विमलो पीयूषधारांव्यधात ।। शुभमस्तु ।। ॐभद्रंॐ ।।

213

३८